Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 137, Śloka 49 **Pāpa** KK 13-1-137-49

उभौ हिनस्ति न भुनक्ति चैषा या चानृते दक्षिणा दीयते वै ।
आघातिनी गर्हितैषा पतन्ती तेषां प्रेतान्पातयेद्वेवयानात् ॥

↩ **Back:** ↩ A.3 · Pāpa ↩ C.16

C.17 To whom do havya and kavya given without mantras or improperly go

Speaker / narration: Dialogue of Nārada and Mārkaṇḍeya, told by Bhīṣma to Yudhiṣṭhira Niyama Pāpa Puṇya

- **Niyama** **Puṇya** Havya and kavya sanctified by mantra never perish; the devas accept them from one who gives properly; such a giver obtains all his desires and is honoured in svarga (Anu. 54.19–20).
- **Pāpa** What is given without mantras and improperly goes, if given by brāhmaṇas, to the asuras; if by kṣatriyas, to the rākṣasas; if by vaiśyas, to the pretas; and if by śūdras, to the bhūtas (Anu. 54.21–22).
- **Pāpa** Neither the devas nor the pitṛs accept the havya and kavya given by those who, born in a lower varṇa (varṇāvare jātāḥ), instruct the four varṇas; these are assigned as sustenance to the yātudhānas, piśācas, bhūtas and nairṛtas (Anu. 54.23–25).
- **Niyama** **Puṇya** The devas partake of havya and kavya given according to the injunctions and with concentration (Anu. 54.26).

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 54, Śloka 19 **Niyama** **Puṇya** KK 13-1-54-19

मन्त्रपूतं सदा हव्यं कव्यं चैव न नश्यति ।
प्रतिगृह्णन्ति तद्देवा दातुर्न्यायात्प्रयच्छतः ॥

↩ **Back:** ↩ C.17

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 54, Śloka 20 **Niyama** **Puṇya** KK 13-1-54-20

सत्वयुक्तं च दाता च सर्वान्कामानवाप्नुयात् ।
अवाप्तकामः स्वर्गे च महीयेत यथेप्सितम् ॥

↩ **Back:** ↩ C.17

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 54, Śloka 21 **Pāpa** KK 13-1-54-21

चत्वारो ह्यथ ये वर्णा हव्यं कव्यं प्रदास्यति ।
मन्त्रहीनमपन्यायं तेषां दत्तं क्व गच्छति ॥

↩ **Back:** ↩ C.17

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 54, Śloka 22 **Pāpa** KK 13-1-54-22

असुरान्गच्छते दत्तं विप्रै रक्षांसि क्षत्रियैः ।
वैश्यैः प्रेतानि वै दत्तं शूद्रैर्भूतानि गच्छति ॥

↩ **Back:** ↩ C.17

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 54, Śloka 23 **Pāpa** KK 13-1-54-23

अथ वर्णावरे जाताश्चातुर्वर्ण्योपदेशिनः ।
दास्यन्ति हव्यकव्यानि तेषां दत्तं क्व गच्छति

↩ **Back:** ↩ C.17

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 54, Śloka 24 **Pāpa** KK 13-1-54-24

वर्णावराणां भूतानां हव्यकव्यप्रदातृणाम् ।
नैव देवा न पितरः प्रतिगृह्णन्ति तत्स्वयम् ॥

↩ **Back:** ↩ C.17

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 54, Śloka 25 **Pāpa** KK 13-1-54-25

यातुधानाः पिशाचाश्च भूता ये चापि नैर्ऋताः ।
तेषां सा विहिता वृत्तिः पितृदैवतनिर्गताः ॥

↩ **Back:** ↩ C.17

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 54, Śloka 26 **Niyama** **Puṇya** KK 13-1-54-26

तेषां सर्वप्रदातृणां हव्यकव्यं समाहिताः ।
यत्प्रयच्छन्ति विधइवत्तद्वै भुञ्जन्ति देवताः ॥

↩ **Back:** ↩ C.17

C.18 Śrāddha food that becomes the share of the rākṣasas

Speaker / narration: Bhīṣma to Yudhiṣṭhira Niyama Pāpa

- **Pāpa** Food that has been stepped over, licked, or seen by a woman in her monthly period — such food is the share of the rākṣasas (Anu. 61.4).
- **Pāpa** Food served after public proclamation (summoning people), eaten by one who has broken his vows, touched by a dog; food into which hair or insects have fallen, that has been sneezed on, seen by dogs, accompanied by weeping, or shaken off — is the share of the rākṣasas (Anu. 61.5–6).
- **Pāpa** What is eaten by one without the oṃkāra, by one bearing weapons, or by a wicked person; in rites for the devas and the pitṛs, what others have left as leavings, what remains after others have eaten — is the share of the rākṣasas (Anu. 61.7–8).
- **Pāpa** A śrāddha served by those of the three varṇas without mantras and without the proper rites; what is served without the oblation of ājya; what is eaten by people of bad conduct — is the share of the rākṣasas (Anu. 61.9–10).
- **Niyama** Bhīṣma said: these are the shares of the rākṣasas; now hear the examination of brāhmaṇas (Anu. 61.11).

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 61, Śloka 4 **Pāpa** KK 13-1-61-4

लङ्घितं चावलीढं च लाकपूर्वं च यत्कृतम्।
रजस्वलाभिदृष्टं च तं भागं रक्षसां विदुः॥

↩ **Back:** ↩ C.18

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 61, Śloka 5 **Pāpa** KK 13-1-61-5

अवघुष्टं च यद्भुक्तमव्रतेन च भारत।
परामृष्टं शुना चैव तं भागं रक्षसां विदुः॥

↩ **Back:** ↩ C.18

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 61, Śloka 6 **Pāpa** KK 13-1-61-6

केशकीटावपतितं क्षुतं श्वभिरवेक्षितम्।
रुदितं चावधूतं च तं भागं रक्षसां विदुः॥

↩ **Back:** ↩ C.18

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 61, Śloka 7 **Pāpa** KK 13-1-61-7

निरोङ्कारेण यद्भुक्तं सशस्त्रेण च भारत।
दुरात्मना च यद्भुक्तं तं भागं रक्षसां विदुः॥

↩ **Back:** ↩ C.18

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 61, Śloka 8 **Pāpa** KK 13-1-61-8

परोच्छिष्टं च यद्भुक्तं परिभुक्तं च यद्भवेत्।
दैवे पित्र्ये च सततं तं भागं रक्षसां विदुः॥

↩ **Back:** ↩ C.18

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 61, Śloka 9 **Pāpa** KK 13-1-61-9

मन्त्रहीनं क्रियाहीनं यच्छ्राद्धं परिविष्यते।
त्रिभिर्वर्णैर्नरश्रेष्ठ तं भागं रक्षसां विदुः॥

↩ **Back:** ↩ C.18

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 61, Śloka 10 **Pāpa** KK 13-1-61-10

आज्याहुतिं विना चैव यत्किञ्चित्परिविष्यते।
दुराचारैश्च यद्भुक्तं तं भागं रक्षसां विदुः॥

↩ **Back:** ↩ C.18

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 61, Śloka 11 **Niyama** KK 13-1-61-11

ये भागा रक्षसां प्राप्तास्त उक्ता भरतर्षभ।
अत ऊर्ध्वं विसर्गस्य परीक्षां ब्राह्मणे शृणु॥

↩ **Back:** ↩ C.18

C.19 Havis seen by a menstruating woman and others

Speaker / narration: Gārgya (a secret dharma told by Bhīṣma) Niyama Pāpa Puṇya

- **Niyama** This is the supreme secret to be observed in the procedure of śrāddha, in rites to the devas, in rites at tīrthas and on parva days (Anu. 190.12).
- **Pāpa** The devas do not eat havis on which falls the glance of a woman in her menses, a woman with leucoderma (śvitra), or an aputrikā; the pitṛ-devatās are not satisfied for thirteen years (Anu. 190.13).
- **Niyama** **Puṇya** If one wears white garments, becomes pure, has brāhmaṇas recite the svastivācana and glorifies the Bhārata, the havis becomes inexhaustible (Anu. 190.14).

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 190, Śloka 12 **Niyama** KK 13-1-190-12

इदं च परमं गुह्यं सरहस्यं निबोधत।
श्राद्धकल्पे च दैवे च तैर्थिके पर्वणीषु च॥

↩ **Back:** ↩ C.19

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 190, Śloka 13 **Pāpa** KK 13-1-190-13

रजस्वला च या नारी श्वित्रिकाऽपुत्रिका च या।
एताभिश्चक्षुषा दृष्टं हविर्नाश्नन्ति देवताः।
पितरश्च न तुष्यन्ति वर्षाण्यपि त्रयोदश॥

↩ **Back:** ↩ A.3 · Pāpa ↩ C.19

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 190, Śloka 14 **Niyama** **Puṇya** KK 13-1-190-14

शुक्लवासाः शुचिर्भूत्वा ब्राह्मणान्स्वस्ति वाचयेत्।
कीर्तयेद्भारतं चैव तथा स्यादक्षयं हविः॥

↩ **Back:** ↩ C.19

C.20 The fault when the unfit tend the fire and the havis, and its expiation

Speaker / narration: Vāyu-deva (the secret dharma told by Bhīṣma) Niyama Pāpa Puṇya

- **Pāpa** If a vṛṣala tends the fire and ignorant women handle the havis, one who regards that very thing as dharma is stained with adharma; the fires become angry with him, and he obtains birth as a śūdra (Anu. 191.5–6).
- **Pāpa** Along with the devas, his pitṛ-devatās too are not satisfied (Anu. 191.7).
- **Niyama** Expiation: for three days, without food and with concentrated mind, he should perform the fire rite with cow's urine, cow dung, milk and ghee (Anu. 191.7–8).
- **Puṇya** Then, when a year is complete, the devas accept (his havis); when the time of śrāddha comes, his pitṛ-devatās rejoice (Anu. 191.9).

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 191, Śloka 5 **Pāpa** KK 13-1-191-5

इदं चैवापरं गुह्यमप्रशस्तं निबोधत।
अग्नेस्तु वृषलो नेता हविर्मूढाश्च योषितः॥

↩ **Back:** ↩ C.20

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 191, Śloka 6 **Pāpa** KK 13-1-191-6

मन्यते धर्म एवेति स चाधर्मेण लिप्यते ।
अग्नयस्तस्य कुप्यन्ति शूद्रयोनिं स गच्छति ॥

↩ **Back:** ↩ C.20

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 191, Śloka 7 **Niyama** **Pāpa** KK 13-1-191-7

पितरश्च न तुष्यन्ति सहदेवैर्विशेषतः ।
प्रायश्चित्तं तु यत्तत्र ब्रुवतस्तन्निबोध मे ।
यत्कृत्वा तु नरः सम्यक्सुखी भवति विज्वरः ॥

↩ **Back:** ↩ C.20 ↩ C.20

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 191, Śloka 8 **Niyama** KK 13-1-191-8

गवां मूत्रपुरीषेण पयसा च घृतेन च ।
अग्निकार्यं त्र्यहं कुर्यान्निराहारः समाहितः ॥

↩ **Back:** ↩ C.20

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 191, Śloka 9 **Puṇya** KK 13-1-191-9

ततः संवत्सरे पूर्णे प्रतिगृह्णन्ति देवताः ।
हृष्यन्ति पितरश्चास्य श्राद्धकाल उपस्थिते ॥

↩ **Back:** ↩ C.20

C.21 Śrāddha offered to the husband of a śūdra woman perishes

Speaker / narration: Nārada to Sṛñjaya (in the story told by Vyāsa to Yudhiṣṭhira) Pāpa

- **Pāpa** Nārada asked whether the story he had told had stayed in Sṛñjaya's mind, or had in the end perished like a śrāddha offered to a śūdrī-pati (the husband of a śūdra woman); that is, this simile shows that a śrāddha offered to such a man bears no fruit (Droṇa. 71.3).

Mahābhārata › Droṇaparva › Abhimanyuvadhaparva › Adhyāya 71, Śloka 3 **Pāpa** KK 7-3-71-3

आहोस्विदन्ततो नष्टं श्राद्धं शूद्रीपताविव ।
स एवमुक्तः प्रत्याह प्राञ्जलिः सृञ्जयस्तदा ॥

↩ **Back:** ↩ C.21

C.22 The śrāddha of those who go to others' wives does not reach the pitṛ-devatās

Speaker / narration: Lomaśa (a secret dharma told by Bhīṣma) Niyama Pāpa

- **Pāpa** The pitṛ-devatās of those who, without marrying, are attached to others' wives are disappointed at the time of śrāddha (Anu. 192.1).
- **Pāpa** One devoted to others' wives, one who resorts to a barren woman, and one who steals what belongs to brāhmaṇas: all three are equally guilty; they are not fit to be spoken to by the pitṛ-devatās; the devas and pitṛ-devatās do not welcome their havis (Anu. 192.2–3).
- **Niyama** Therefore one who desires his own good should give up others' wives and barren women, and should not steal what belongs to brāhmaṇas (Anu. 192.4).

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 192, Śloka 1 **Pāpa** KK 13-1-192-1

परदारेषु ये सक्ता अकृत्वा दारसङ्ग्रहम् ।
निराशाः पितरस्तेषां श्राद्धकाले भवन्ति वै ॥

↩ **Back:** ↩ C.22

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 192, Śloka 2 **Pāpa** KK 13-1-192-2

परदाररतिर्यश्च यश्च वन्ध्यामुपासते ।
ब्रह्मस्वं हरते यश्च समदोषा भवन्ति ते ॥

↩ **Back:** ↩ C.22

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 192, Śloka 3 **Pāpa** KK 13-1-192-3

असम्भाष्या भवन्त्येते पितॄणां नात्र संशयः ।
देवताः पितरश्चैषां नाभिनन्दन्ति तद्विधः ॥

↩ **Back:** ↩ C.22

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 192, Śloka 4 **Niyama** KK 13-1-192-4

तस्मात्परस्य वै दारांस्त्यजेद्बन्ध्यां च योषितम् ।
ब्रह्मस्वं हि न हर्तव्यमात्मनो हितमिच्छता ॥

↩ **Back:** ↩ C.22

C.23 The havya and kavya given by kuṇḍas and golakas born of another’s wife go to the rākṣasas

Speaker / narration: Nārada to Mārkaṇḍeya Niyama Pāpa

- **Pāpa** The devas do not accept the havya and kavya of those women (the parāmṛṣṭās mentioned in the earlier ślokas); one who begets sons in them does not become possessed of sons through those sons (Anu. 57.7).
- **Pāpa** Those sons, born in another’s field, destroy the havya and kavya given in this world and the next (Anu. 57.14).
- **Pāpa** Both the kṣetrika (one who does not guard his wife) and the bījī (one who has gone to another’s wife) go to naraka; the kuṇḍa and the others are condemned by the pitṛ-devatās (Anu. 57.16–18).
- **Pāpa** The havya and kavya given by such condemned sons are taken by the yātudhānas, the piśācas and the night-roaming bhūtas (Anu. 57.19–20).
- **Niyama** If sons born in their line to virtuous women give havya and kavya with good conduct, the pitṛ-devatās are satisfied; the devas accept the havya and kavya given by the pure (Anu. 57.24–25).

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 57, Śloka 7 **Pāpa** KK 13-1-57-7

न चासां हव्यकव्यानि प्रतिगृह्णन्ति देवताः ।
यस्तासु जनयेत्पुत्रान्न तैः पुत्रमवाप्नुयात् ॥

↩ **Back:** ↩ C.23

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 57, Śloka 14 **Pāpa** KK 13-1-57-14

ते च जाताः परक्षेत्रे देहिनां प्रेत्य चेह च ।
दत्तानि हव्यकव्यानि नाशयन्त्यथ दातृणाम् ॥

↩ **Back:** ↩ C.23

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 57, Śloka 16 **Pāpa** KK 13-1-57-16

कस्य ते गर्हिताः पुत्राः पितॄणां हव्यकव्यदाः ।
यस्य क्षेत्रे प्रसूयन्ते यो वा ताञ्जनयेत्सुतान् ॥

↩ **Back:** ↩ C.23

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 57, Śloka 17 **Pāpa** KK 13-1-57-17

क्षेत्रिकश्चैव बीजी च द्वावेतौ निरयं गतौ ।
न रक्षति च यो दारान्परदाराश्च गच्छति ॥

↩ **Back:** ↩ C.23

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 57, Śloka 18 **Pāpa** KK 13-1-57-18

गर्हितास्ते नरा नित्यं धर्माचारबहिष्कृताः ।
कुण्डो भोक्ता च भोगी च कुत्सिताः पितृदैवतैः ॥

↩ **Back:** ↩ C.23

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 57, Śloka 19 **Pāpa** KK 13-1-57-19

तथैते गर्हिताः पुत्रा हव्यकव्यानि नारद ।
कस्य नित्यं प्रयच्छन्ति धर्मो वा तेषु किं फलं ॥

↩ **Back:** ↩ C.23

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 57, Śloka 20 **Pāpa** KK 13-1-57-20

यातुधानाः पिशाचाश्च प्रतिगृह्णन्ति तैर्हुतम् ।
हव्यं कव्यं च तैर्दत्तं ये च भूता निशाचराः ॥

↩ **Back:** ↩ C.23

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 57, Śloka 24 **Niyama** KK 13-1-57-24

साध्वीजाताः सुतास्तेषां तां वृत्तिमनुतिष्ठताम् ।
प्रीणन्ति पितृदैवत्यं हव्यकव्यसमाहिताः ॥

↩ **Back:** ↩ C.23

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 57, Śloka 25 **Niyama** KK 13-1-57-25

एवं गोलककुण्डाभ्यां ये च वर्णापदेशिनः ।
हव्यं कव्यं च शुद्धानां प्रतिगृह्णन्ति देवताः ॥

↩ **Back:** ↩ C.23

C.24 Union forbidden on the day of śrāddha; purity of the one who eats

Speaker / narration: The pitṛ-devatās to a divine messenger — as Bhīṣma told Yudhiṣṭhira Niyama Pāpa Puṇya

- **Niyama** A divine messenger who had come at the command of the Aśvins asked the pitṛ-devatās: why is sexual union forbidden in śrāddha to the giver and to the one who eats (Anu. 188.18–20)?
- **Niyama** The devas and the pitṛs honoured that messenger and welcomed him, saying that his question had a deep meaning (Anu. 188.22–23).
- **Pāpa** The pitṛs of a man who goes to a woman after giving or eating a śrāddha lie in that semen for the whole month (Anu. 188.24).
- **Niyama** It is held that union should be avoided on that day (Anu. 188.40).
- **Niyama** **Puṇya** Śrāddha should always be eaten only in purity; therefore a twice-born should bathe and, pure and forbearing, partake of the śrāddha; the offspring of one who gives in this way flourish (Anu. 188.41–42).

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 188, Śloka 18 **Niyama** KK 13-1-188-18

कस्यचित्त्वथ कालस्य देवदूतो यदृच्छया ।
स्थितो ह्यन्तर्हितो भूत्वा पर्यभाषत वासवम् ॥

↩ **Back:** ↩ C.24

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 188, Śloka 19 **Niyama** KK 13-1-188-19

यौ तौ कामगुणोपेतावश्विनौ भिषजां वरौ ।
आज्ञयाऽहं तयोः प्राप्तः सनरान्पितृदैवतान् ॥

↩ **Back:** ↩ C.24

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 188, Śloka 20 **Niyama** KK 13-1-188-20

कस्माद्धि मैथुनं श्राद्धे दातुर्भोक्तुश्च वर्जितम् ।
केमर्थं च त्रयः पिण्डाः प्रविभक्ताः पृथक्पृथक् ॥

↩ **Back:** ↩ C.24 ↩ E.6

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 188, Śloka 22 **Niyama** KK 13-1-188-22

श्रद्दधानेन दूतेन भाषितं धर्मसंहितम् ।
पूर्वस्थास्त्रिदशाः सर्वे पितरः पूज्य खेचरम् ॥

↩ **Back:** ↩ C.24

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 188, Śloka 23 **Niyama** KK 13-1-188-23

पितर ऊचुः
स्वागतं तेऽस्तु भद्रं ते श्रूयतां खेचरोत्तम ।
गूढार्थः परमः प्रश्नो भवता समुदीरितः ॥

↩ **Back:** ↩ C.24

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 188, Śloka 24 **Pāpa** KK 13-1-188-24

श्राद्धं दत्त्वा च भुक्त्वा च पुरुषो यः स्त्रियं व्रजेत् ।
पितरस्तस्य तं मासं तस्मिन्रेतसि शेरते ॥

↩ **Back:** ↩ A.3 · Pāpa ↩ C.24

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 188, Śloka 40 **Niyama** KK 13-1-188-40

ऋत्विग्यो यजमानस्य पितृत्वमनुगच्छति ।
तस्मिन्नहनि मन्यन्ते परिहार्यं हि मैथुनम् ॥

↩ **Back:** ↩ C.24

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 188, Śloka 41 **Niyama** **Puṇya** KK 13-1-188-41

शुचिना तु सदा श्राद्धं भोक्तव्यं खेचरोत्तम ।
ये मया कथिता दोषास्ते तथा स्युर्न चान्यथा ॥

↩ **Back:** ↩ C.24

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 188, Śloka 42 **Niyama** **Puṇya** KK 13-1-188-42

तस्मात्स्नातः शुचिः क्षान्तः श्राद्धं भुञ्जीत वै द्विजः ।
प्रजा विवर्धते चास्य यश्चैवं सम्प्रयच्छति ॥

↩ **Back:** ↩ C.24

C.25 Sexual union on the occasion of śrāddha — the worlds of sinners

Speaker / narration: Sañjaya to Dhṛtarāṣṭra (the vow of the Saṃśaptakas) Pāpa

- **Pāpa** The Saṃśaptakas vowed that if they failed to kill Arjuna, they would go to the worlds reached by sinners such as those who break their vows, slayers of brāhmaṇas, drinkers of liquor and violators of the guru's wife (Droṇa. 17.30, 35).
- **Pāpa** That list of sinners also includes the 'śrāddha-maithunikas' (those who engage in sexual union on the occasion of śrāddha) (Droṇa. 17.33).

Mahābhārata › Droṇaparva › Droṇābhiṣekaparva › Adhyāya 17, Śloka 30 **Pāpa** KK 7-2-17-30

ये वै लोकाश्चाव्रतिनां ये चैव ब्रह्मघातिनाम् ।
मद्यपस्य च ये लोका गुरुदाररतस्य च ॥

↩ **Back:** ↩ C.25

Mahābhārata › Droṇaparva › Droṇābhiṣekaparva › Adhyāya 17, Śloka 33 **Pāpa** KK 7-2-17-33

स्वभार्यामृतुकालेषु मोहाद्वै नाभिगच्छताम् ।
श्राद्धमैथुनिकानां च ये चाप्यात्मापहारिणाम् ॥

↩ **Back:** ↩ C.25

C.26 Prohibitions concerning the śrāddha meal

Speaker / narration: Bhīṣma to Yudhiṣṭhira Niyama Pāpa

- **Niyama** One should not eat at another's śrāddha (Anu. 161.100).
- **Pāpa** If, while his wife is pregnant, a husband bathes in the sea, has a shave or eats a śrāddha meal, he does not obtain the fruit of a son (Anu. 161.138).
- **Niyama** One should not eat at an ekoddiṣṭa — especially the first ekoddiṣṭa; the meals of the sapiṇḍīkaraṇa and of the monthly śrāddhas are also to be avoided (Anu. 161.155).

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 161, Śloka 100 **Niyama** KK 13-1-161-100

सायं प्रातश्च भुञ्जीत नान्तराले समाहितः ।
वालेन तु न भुञ्जीत परश्राद्धं तथैव च ॥

↩ **Back:** ↩ C.26

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 161, Śloka 138 **Pāpa** KK 13-1-161-138

सामुद्रेणाम्भसा स्नानं क्षौरं श्राद्धेषु भोजनम् ।
अन्तर्वत्नीपतिः कुर्वन्न पुत्रफलमश्नुते ॥

↩ **Back:** ↩ C.26

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 161, Śloka 155 **Niyama** KK 13-1-161-155

एकोद्दिष्टं न भुञ्जीत प्रथमं तु विशेषतः ।
सपिण्डीकरणं वर्ज्यं सविधानं च मासिकम् ॥

↩ **Back:** ↩ C.26

C.27 The faults committed by an invited brāhmaṇa and by the one who invites

Speaker / narration: Bhīṣma to Yudhiṣṭhira Niyama Pāpa

- **Pāpa** If a brāhmaṇa first invited by one brāhmaṇa eats elsewhere, he incurs a quarter of the pāpa of killing a cow; if he eats with those of lower varṇas, progressively more; with a śūdra, four times as much (Anu. 61.43–44).
- **Niyama** **Pāpa** One who has been invited first should not eat elsewhere; there is fault also in not eating; an invitation from a śūdra should be avoided; a dvija nourished on a śūdra's food does not attain the higher path (Anu. 61.44–45; 61.52–53).
- **Niyama** One who is impure, an unbeliever, or devoid of self-respect should not eat; one should not, out of greed, break a word given earlier (Anu. 61.46).
- **Pāpa** A brāhmaṇa who eats at rites for the devas or the pitṛs without bathing incurs the fault of untruth; if, while in aśauca, he knowingly eats out of greed, he incurs the fault of untruth concerning a cow (Anu. 61.54–55).
- **Pāpa** One who invites for some other purpose incurs the fault of untruth; if one serves food with mantras to those without Vedic vows and conduct, one incurs the fault of untruth concerning a cow (Anu. 61.56–57).

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 61, Śloka 43 **Pāpa** KK 13-1-61-43

वैश्यस्य दैवे वक्तव्यं प्रीयन्तां देवता इति ।
गोहिंसायां चतुर्भागं पूर्वं विप्रातिकेतिनः ॥

↩ **Back:** ↩ C.27

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 61, Śloka 44 **Niyama** **Pāpa** KK 13-1-61-44

वर्णावरेषु भुञ्जानं क्रमाच्छूद्रे चतुर्गुणम् ।
नान्यत्र ब्राह्मणो ब्रूयात्पूर्वं विप्रेण केतितः ॥

↩ **Back:** ↩ C.27 ↩ C.27

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 61, Śloka 45 **Niyama** **Pāpa** KK 13-1-61-45

अभोजने च दोषः स्याद्भुर्जयेच्छूद्रकेतनम् ।
शूद्रान्नरसपुष्टाङ्गो द्विजो नोर्ध्वां गतिं लभेत् ॥

↩ **Back:** ↩ C.27

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 61, Śloka 46 **Niyama** KK 13-1-61-46

अशुचिर्नैव चाश्नीयान्नास्तिको मानवर्जितः ।
न पूर्वं लङ्घयेल्लोभादेकवर्णोऽपि पार्थिव ॥

↩ **Back:** ↩ C.27

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 61, Śloka 52 **Niyama** **Pāpa** KK 13-1-61-52

नान्यत्र ब्राह्मणोऽश्नीयात्पूर्वं विप्रेण केतितः ।
यवीयान्पशुहिंसायां तुल्यधर्मा भवेत्स हि ॥

↩ **Back:** ↩ C.27

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 61, Śloka 53 **Niyama** **Pāpa** KK 13-1-61-53

तथा राजन्यवैश्याभ्यां यद्यश्नीयात्तु केतितः ।
यवीयान्पशुहिंसायां भागार्धं समवाप्नुयात् ॥

↩ **Back:** ↩ C.27

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 61, Śloka 54 **Pāpa** KK 13-1-61-54

दैवं वाऽप्यथवा पित्र्यं योऽश्नीयाद्ब्राह्मणादिषु ।
अस्नातो ब्राह्मणो राजंस्तस्याधर्मोऽनृतं स्मृतम् ॥

↩ **Back:** ↩ C.27

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 61, Śloka 55 **Pāpa** KK 13-1-61-55

आशौचो ब्राह्मणो राजन्योऽश्नीयाद्ब्राह्मणादिषु ।
ज्ञानपूर्वमथो लोभात्तस्याधर्मो गवानृतम् ॥

↩ **Back:** ↩ C.27

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 61, Śloka 56 **Pāpa** KK 13-1-61-56

अर्थेनान्येन यो लिप्सेत्कर्मार्थं चैव भारत ।
आमन्त्रयति राजेन्द्र तस्याधर्मोऽनृतं स्मृतम् ॥

↩ **Back:** ↩ C.27

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 61, Śloka 57 **Pāpa** KK 13-1-61-57

अवेदव्रतचारित्रास्त्रिभिर्वर्णैर्युधिष्ठिर ।
मन्त्रवत्परिविष्यन्ते तस्याधर्मो गवानृतम् ॥

↩ **Back:** ↩ C.27

C.28 The fault of eating food in aśauca and food of an ekoddiṣṭa

Speaker / narration: Śrī Kṛṣṇa to Yudhiṣṭhira Niyama Pāpa

- **Niyama** Among the foods not fit to be eaten is sūtaka food (food from a house under aśauca) (Āśva. 107.15).
- **Pāpa** The Lord said that even He does not know the fate of a twice-born who has nourished his body with the food of those under death-impurity and with the food of śūdras (Āśva. 110.16).
- **Niyama** **Pāpa** If one eats the food of those under the aśauca of death or birth, one should perform the cāndrāyaṇa (Āśva. 112.35).
- **Niyama** **Pāpa** A twice-born who has eaten at an ekoddiṣṭa should perform the cāndrāyaṇa (Āśva. 112.41).

Mahābhārata › Āśvamedhikaparva › Vaiṣṇavadharmaparva › Adhyāya 107, Śloka 15 **Niyama** KK 14-3-107-15

चिकित्सकस्य दूतस्य तथा चोच्छिष्टभोजिनः ।
उग्रान्नं सूतकान्नं च शूद्रोच्छेषणमेव च ॥

↩ **Back:** ↩ C.28

Mahābhārata › Āśvamedhikaparva › Vaiṣṇavadharmaparva › Adhyāya 110, Śloka 16 **Pāpa** KK 14-3-110-16

मृतसूतकपुष्टाङ्गो यश्च शूद्रान्नभुग्द्विजः ।
अहं चापि न जानामि गतिं तस्य नराधिप ॥

↩ **Back:** ↩ C.28

Mahābhārata › Āśvamedhikaparva › Vaiṣṇavadharmaparva › Adhyāya 112, Śloka 35 **Niyama** **Pāpa** KK 14-3-112-35

अनिर्दशाया गोः क्षीरमौष्ट्रमाविकमेव च ।
मृतसूतकयोश्चान्नं भुक्त्वा चान्द्रायणं चरेत् ॥

↩ **Back:** ↩ C.28

Mahābhārata › Āśvamedhikaparva › Vaiṣṇavadharmaparva › Adhyāya 112, Śloka 41 **Niyama** **Pāpa** KK 14-3-112-41

एकोद्दिष्टं तु यो भुङ्क्ते जनमध्यगतोऽपि यः ।
भिन्नभाण्डेषु यो भुङ्क्ते द्विजश्चान्द्रायणं चरेत् ॥

↩ **Back:** ↩ C.28

C.29 When the order of feeding at a śrāddha is reversed, worthy brāhmaṇas do not accept

Speaker / narration: Kausalyā to Daśaratha (as a simile) Niyama Pāpa

- **Niyama** Kausalyā spoke of a well-known thing: some people at a śrāddha first feed their own relatives, and only after their own purpose is served do they look toward the worthy brāhmaṇas (Rām. Ayo. 61.12).
- **Niyama** **Pāpa** In such a case, virtuous and learned brāhmaṇas will not afterwards accept even food like amṛta; just as excellent bulls do not tolerate the cutting of their horns, wise and excellent dvijas do not accept what is left over after others (even if they are brāhmaṇas) have eaten (Rām. Ayo. 61.13–14).

Śrīmad Rāmāyaṇa › Ayodhyākāṇḍa › Sarga 61 › Śloka 12 **Niyama** Vā.Rā. 2.61.12

भोजयन्ति किल श्राद्धे केचित् स्वानेव बान्धवान् ।
ततः पश्चात् समीक्षन्ते कृतकार्या द्विजोत्तमान् ॥

↩ **Back:** ↩ C.29

Śrīmad Rāmāyaṇa › Ayodhyākāṇḍa › Sarga 61 › Śloka 13 **Niyama** **Pāpa** Vā.Rā. 2.61.13

तत्र ये गुणवन्तश्च विद्वांसश्च द्विजातयः ।
न पश्चात् तेऽभिमन्यन्ते सुधामपि सुरोपमाः ॥

↩ **Back:** ↩ C.29

Śrīmad Rāmāyaṇa › Ayodhyākāṇḍa › Sarga 61 › Śloka 14 **Niyama** **Pāpa** Vā.Rā. 2.61.14

ब्राह्मणेष्वपि वृत्तेषु भुक्तशेषं द्विजोत्तमाः।
नाभ्युपेतुमलं प्राज्ञाः शृङ्गच्छेदमिवर्षभाः॥

↩ **Back:** ↩ C.29

C.30 Śrāddha must not be performed on another's land

Speaker / narration: Bhīṣma to Yudhiṣṭhira Niyama Pāpa Puṇya

- **Pāpa** When one offers nivāpa (piṇḍa) to the pitṛs on another's land, his śrāddha rite is spoiled by the pitṛs of that land('s owner) (Anu. 101.33).
- **Niyama** **Puṇya** Therefore a wise person should buy and give even a little land; the piṇḍa offered to the pitṛs on that land becomes everlasting (Anu. 101.34).
- **Niyama** Forests, mountains, rivers and tīrthas are said to belong to no owner (Anu. 101.35).

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 101, Śloka 33 **Pāpa** KK 13-1-101-33

पारक्ये भूमिदेशे तु पितॄणां निर्वपेत्तु यः।
तद्भूमिं वाऽपि पितृभिः श्राद्धकर्म विहन्यते॥

↩ **Back:** ↩ A.4 · Niyama ↩ C.30

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 101, Śloka 34 **Niyama** **Puṇya** KK 13-1-101-34

तस्मात्क्रीत्वा महीं दद्यात्स्वल्पामपि विचक्षणः।
पिण्डः पितृभ्यो दत्तो वै तस्यां भवति शाश्वतः॥

↩ **Back:** ↩ C.30

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 101, Śloka 35 **Niyama** KK 13-1-101-35

अटवी पर्वताश्चैव नद्यस्तीर्थानि यानि च।
सर्वाण्यस्वामिकान्याहुर्न हि तत्र परिग्रहः॥

↩ **Back:** ↩ A.4 · Niyama ↩ C.30

C.31 Pauṣya cursed for serving impure food at śrāddha

Speaker / narration: Sauti (the dialogue of Uttaṅka and Pauṣya) Example Niyama Pāpa

- **Example** When Uttaṅka, a virtuous guest, arrived, King Pauṣya requested: ‘After a long time a worthy recipient has come; I wish to perform a śrāddha; please grant me time’ (Ādi. 3.114).
- **Example** Uttaṅka agreed, and Pauṣya served him food that was already prepared (Ādi. 3.115).
- **Pāpa** Seeing that the food contained hair and had gone cold, Uttaṅka judged it impure and cursed him: ‘Because you served impure food, you will become blind’ (Ādi. 3.116).
- **Example** When Pauṣya cursed him in return, Uttaṅka said that it was not proper to serve impure food and then give a counter-curse, and told him to look at the food himself (Ādi. 3.117–118).
- **Niyama** **Pāpa** Pauṣya realised that the food was cold and impure with hair because it had been brought by a woman with dishevelled hair, and he begged forgiveness (Ādi. 3.119–120).
- **Pāpa** Uttaṅka softened the curse, saying: ‘You will become blind, and soon regain your sight’ (Ādi. 3.121).

Mahābhārata › Ādiparva › › Adhyāya 3, Śloka 114 **Example** KK 1-3-3-114

भगवंश्चिरेण पात्रमासाद्यते भवाश्च गुणवानतिथिस्तदिच्छे श्राद्धं कर्तुं क्रियतां क्षण इति॥

↩ **Back:** ↩ C.31

Mahābhārata › Ādiparva › › Adhyāya 3, Śloka 115 **Example** KK 1-3-3-115

तमुत्तङ्कः प्रत्युवाच कृतक्षण एवास्मि शीघ्रमिच्छामि यथोपपन्नमन्नमुपस्कृतं भवतेति स तथेत्युक्त्वा यथोपपन्नेनान्नेनैनं भोजयामास ॥

↩ **Back:** ↩ C.31

Mahābhārata › Ādiparva › › Adhyāya 3, Śloka 116 **Pāpa** KK 1-3-3-116

अथोत्तङ्कः सकेशं शीतमन्नं दृष्ट्वा अशुच्येतदिति मत्वा तं पौष्यमुवाच ।
यस्मान्मे अशुच्यन्नं ददासि तस्मादन्धो भविष्यसीति ॥

↩ **Back:** ↩ A.3 · Pāpa ↩ C.31

Mahābhārata › Ādiparva › › Adhyāya 3, Śloka 117 **Example** KK 1-3-3-117

तं पौष्यः प्रत्युवाच ।
यस्मात्त्वमदुष्टमन्नंदूषयसि तस्मादनपत्यो भविष्यसीति तमुत्तङ्कः प्रत्युवाच ॥

↩ **Back:** ↩ C.31

Mahābhārata › Ādiparva › › Adhyāya 3, Śloka 118 **Example** KK 1-3-3-118

न युक्तं भवताऽन्नमशुचि दत्त्वा प्रतिशापं दातुं तस्मादन्नमेव प्रत्यक्षीकुरु ।
ततः पौष्यस्तदन्नमशुचि दृष्ट्वा तस्याशुचिभावमपरोक्षयामास ॥

↩ **Back:** ↩ C.31

Mahābhārata › Ādiparva › › Adhyāya 3, Śloka 119 **Niyama** **Pāpa** KK 1-3-3-119

अथ तदन्नं मुक्तकेश्या स्त्रियोपहृतमनुष्णं सकेशं चाशुच्येतदिति मत्वा तमृषिमुत्तङ्कं प्रसादयामास ॥

↩ **Back:** ↩ C.31

Mahābhārata › Ādiparva › › Adhyāya 3, Śloka 120 **Niyama** **Pāpa** KK 1-3-3-120

भगवन्नेतदज्ञानादन्नं सकेशमुपाहृतं शीतं च ।
तत्क्षामये भवन्तं न भवेयमन्ध इति ।
C तमुत्तङ्कः प्रत्युवाच ॥

↩ **Back:** ↩ C.31

Mahābhārata › Ādiparva › › Adhyāya 3, Śloka 121 **Pāpa** KK 1-3-3-121

न मृषा ब्रवीमि भूत्वा त्वमन्धो नचिरादनन्धो भविष्यसीति ।
ममापि शापो भवता दत्तो न भवेदिति ॥

↩ **Back:** ↩ C.31

C.32 The fruit of last rites performed with unrighteous wealth does not reach the performer

Speaker / narration: Vidura to Dhṛtarāṣṭra Pāpa

- **Pāpa** One who performs the aurdhvadaihika (last) rites with wealth gained unrighteously does not himself enjoy its fruit after death, since that wealth came by an evil way (Udyoga. 39.67).

Mahābhārata › Udyogaparva › Prajāgaraparva › Adhyāya 39, Śloka 67 **Pāpa** KK 5-3-39-67

अधर्मोपार्जितैरर्थैर्यः करोत्यौर्ध्वदेहिकम् ।
न स तस्य फलं प्रेत्य भुङ्क्तेऽर्थस्य दुरागमात् ॥

↩ **Back:** ↩ C.32

C.33 Vikukṣi, who ate the aṣṭakā-śrāddha offerings beforehand, is banished from the kingdom

Speaker / narration: Śuka Maharṣi to Parīkṣit Example Niyama Pāpa

- **Example** Once, on the occasion of an aṣṭakā śrāddha, King Ikṣvāku commanded his son Vikukṣi to bring, without delay, certain pure articles fit for the śrāddha (other articles) (Bhāg. 9.7.6).
- **Example** **Pāpa** Vikukṣi went to the forest and gathered articles fit for the rite; but, tired, hungry and forgetful, he ate one of them himself and offered the rest to his father (Bhāg. 9.7.7–8).
- **Niyama** **Pāpa** When the king asked for the prokṣaṇa (sprinkling) to be done, his guru said, ‘This is defiled; it is unfit for the rite’ (Bhāg. 9.7.8).
- **Pāpa** Learning of his son's deed from what the guru said, the king in anger banished from the kingdom that son who had abandoned the injunction (Bhāg. 9.7.9).

Śrīmad Bhāgavatam › Navama Skandha › Adhyāya 7 › Śloka 6 **Example** Bhāg. 9.7.6

स एकदाऽष्टकाश्राद्ध इक्ष्वाकुः सुतमादिशत् ।
मांसमानीयतां मेध्यं विकुक्षे गच्छ मा चिरम् ॥

↩ **Back:** ↩ C.33

Śrīmad Bhāgavatam › Navama Skandha › Adhyāya 7 › Śloka 7 **Example** **Pāpa** Bhāg. 9.7.7

तथेति सवनं गत्वा मृगान् हत्वा क्रियार्हणान् ।
श्रान्तो बुभुक्षितो वीरः शशमाददपस्मृतिः ॥

↩ **Back:** ↩ A.3 · Pāpa ↩ C.33

Śrīmad Bhāgavatam › Navama Skandha › Adhyāya 7 › Śloka 8 **Example** **Niyama** **Pāpa** Bhāg. 9.7.8

शेषं निवेदयामास पित्रे तेन च तद्गुरुः ।
चोदितः प्रोक्षणायाह दुष्टमेतदकर्मकम् ॥

↩ **Back:** ↩ A.3 · Pāpa ↩ C.33 ↩ C.33

Śrīmad Bhāgavatam › Navama Skandha › Adhyāya 7 › Śloka 9 **Pāpa** Bhāg. 9.7.9

ज्ञात्वा पुत्रस्य तत्कर्म गुरुणाऽभिहितं नृपः ।
देशान्निस्सारयामास सुतं त्यक्तविधिं रुषा ॥

↩ **Back:** ↩ A.3 · Pāpa ↩ C.33

C.34 The pitṛs' curse on Krodha (Anger), which spoiled Jamadagni's śrāddha milk

Speaker / narration: Vaiśampāyana to Janamejaya Example Niyama Pāpa

- **Example** Long ago Jamadagni Maharṣi resolved to perform a śrāddha; when the homa-cow came of her own accord, he milked her himself and placed the milk in a new, sturdy, pure vessel (Āśva. 95.3–4).
- **Example** Wishing to test the ṛṣi, Krodha (Anger) came in the form of a mongoose, knocked over the vessel and spoiled the milk (Āśva. 95.4–5).
- **Example** Though he knew it was Krodha, the muni did not become angry; Krodha took the form of a brāhmaṇa, admitted that he was defeated and begged him for grace (Āśva. 95.6–8).
- **Niyama** Jamadagni said, ‘You have done me no harm, and I have no anger; but consider the matter of those great pitṛ-devatās for whom I intended this milk; go’ (Āśva. 95.9–10).
- **Pāpa** Frightened, Krodha vanished on the spot and, through the curse (abhiṣaṅga) of the pitṛ-devatās, took the form of a mongoose (Āśva. 95.11).
- **Example** When it propitiated the pitṛ-devatās for the end of the curse, they said the curse would end when it reproached Dharma; wandering through the places of yajña and Dharmāraṇya, it reproached Dharmarāja at Yudhiṣṭhira's yajña with the account of the saktuprastha (measure of barley flour) and was freed from the curse (Āśva. 95.12–14).

Mahābhārata › Āśvamedhikaparva › Anugītāparva › Adhyāya 95, Śloka 3 **Example** KK 14-2-95-3

श्राद्धं सङ्कल्पयामास जमदग्निः पुरा किल ।
होमधेनुस्तमागाच्च स्वयमेव दुदोह ताम् ॥

↩ **Back:** ↩ C.34

Mahābhārata › Āśvamedhikaparva › Anugītāparva › Adhyāya 95, Śloka 4 **Example** KK 14-2-95-4

तत्पयः स्थापयामास नवे भाण्डे दृढे शुचौ ।
क्रोधो नकुलरूपेण पिठरं पर्यकर्षयत् ॥

↩ **Back:** ↩ A.3 · Pāpa ↩ C.34 ↩ C.34

Mahābhārata › Āśvamedhikaparva › Anugītāparva › Adhyāya 95, Śloka 5 **Example** KK 14-2-95-5

जिज्ञासुस्तमृषिश्रेष्ठं किं कुर्याद्विप्रिये कृते ।
इति सञ्चिन्त्य दुर्मेधा धर्षयामास तत्पयः ॥

↩ **Back:** ↩ A.3 · Pāpa ↩ C.34

Mahābhārata › Āśvamedhikaparva › Anugītāparva › Adhyāya 95, Śloka 6 **Example** KK 14-2-95-6

तमाज्ञाय मुनिः क्रोधं नैवास्य स चुकोप ह ।
स तु क्रोधस्ततो राजन्ब्राह्मणीं मूर्तिमास्थितः ॥

↩ **Back:** ↩ C.34

Mahābhārata › Āśvamedhikaparva › Anugītāparva › Adhyāya 95, Śloka 7 **Example** KK 14-2-95-7

जितोस्मीति भृगुश्रेष्ठ भृगवो ह्यतिरोषणाः ।
लोके मिथ्याप्रवादोयं यत्त्वयाऽस्मि विनिर्जितः ॥

↩ **Back:** ↩ C.34

Mahābhārata › Āśvamedhikaparva › Anugītāparva › Adhyāya 95, Śloka 8 **Example** KK 14-2-95-8

वशे स्थितोऽहं त्वय्यद्य क्षमावति महात्मनि ।
बिभेमि तपसः साधो प्रसादं कुरु मे प्रभो ॥

↩ **Back:** ↩ C.34

Mahābhārata › Āśvamedhikaparva › Anugītāparva › Adhyāya 95, Śloka 9 **Niyama** KK 14-2-95-9

जमदग्निरुवाच
साक्षाद्दृष्टोसि मे क्रोध गच्छ त्वं विगतज्वरः ।
न त्वयापकृतं मेऽद्य न च मे मन्युरस्ति वै ॥

↩ **Back:** ↩ C.34

Mahābhārata › Āśvamedhikaparva › Anugītāparva › Adhyāya 95, Śloka 10 **Niyama** KK 14-2-95-10

यान्समुद्दिश्य सङ्कल्पः पयसोस्य कृतो मया ।
पितरस्ते महाभागास्तेभ्यो बुद्ध्यस्व गम्यताम् ॥

↩ **Back:** ↩ C.34

Mahābhārata › Āśvamedhikaparva › Anugītāparva › Adhyāya 95, Śloka 11 **Pāpa** KK 14-2-95-11

इत्युक्तो जातसन्त्रासस्तत्रैवान्तरधीयत ।
पितॄणामभिषङ्गाच्च नकुलत्वमुपागतः ॥

↩ **Back:** ↩ A.3 · Pāpa ↩ C.34

Mahābhārata › Āśvamedhikaparva › Anugītāparva › Adhyāya 95, Śloka 12 **Example** KK 14-2-95-12

स तान्प्रसादयामास शापस्यान्तो भवेदिति ।
तैश्चाप्युक्तः क्षिपन्धर्मं शापस्यान्तमवाप्स्यसि ॥

↩ **Back:** ↩ C.34

Mahābhārata › Āśvamedhikaparva › Anugītāparva › Adhyāya 95, Śloka 13 **Example** KK 14-2-95-13

तैश्चोक्तो यज्ञियान्देशान्धर्मारण्यं तथैव च ।
जुगुप्समानो धावन्स तं यज्ञं समुपासदत् ॥

↩ **Back:** ↩ C.34

Mahābhārata › Āśvamedhikaparva › Anugītāparva › Adhyāya 95, Śloka 14 **Example** KK 14-2-95-14

धर्मपुत्रमथाक्षिप्य सक्तुप्रस्थेन तेन सः ।
मुक्तः शापात्ततः क्रोधो धर्मो ह्यासीद्युधिष्ठिरः ॥

↩ **Back:** ↩ C.34

C.35 Faults in śrāddha named in Jamadagni's oath

Speaker / narration: Jamadagni to Agastya (the story of the oaths over the stolen lotus; told by Bhīṣma) Pāpa

- **Pāpa** Jamadagni swore: 'May he who stole your lotus become one who recites the Veda on days when study is forbidden, one who feeds a friend at a śrāddha, and one who eats at a śūdra's śrāddha'; that is, these are declared to be faulty acts (Anu. 143.25).

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 143, Śloka 25 **Pāpa** KK 13-1-143-25

जमदग्निरुवाच
अनध्यायेष्वधीयीत मित्रं श्राद्धे च भोजयेत् ।
श्राद्धे शूद्रस्य चाश्नीयाद्यस्ते हरति पुष्करम् ॥

↩ **Back:** ↩ C.35

C.36 Not offering śrāddha to a worthy neighbour, and offering it to the unworthy

Speaker / narration: Arjuna (the vow to slay Jayadratha), as Sañjaya told Dhṛtarāṣṭra Pāpa

- **Pāpa** Arjuna vowed that if he did not slay Jayadratha, he himself would meet the dreadful fate met by one who does not offer śrāddha to a worthy neighbour and who offers śrāddha to the unworthy and to a vṛṣalīpati (the husband of a śūdra woman) — along with drunkards, the ungrateful and the like (Droṇa. 73.42–43).

Mahābhārata › Droṇaparva › Pratijñāparva › Adhyāya 73, Śloka 42 **Pāpa** KK 7-4-73-42

अर्हते प्रातिवेश्याय श्राद्धं यो न ददाति च ।
अनर्हेभ्यश्च यो दद्याद्वृषलीपतये तथा ॥

↩ **Back:** ↩ C.36

Mahābhārata › Droṇaparva › Pratijñāparva › Adhyāya 73, Śloka 43 **Pāpa** KK 7-4-73-43

मद्यपो भिन्नमर्यादः कृतघ्नो भर्तृनिन्दकः ।
तेषां गतिमियां क्षिप्रं न चेद्धन्यां जयद्रथम् ॥

↩ **Back:** ↩ C.36

C.37 Those who worship the pitṛ-devatās and others with meat obtained through violence are wicked

Speaker / narration: Śrī Kṛṣṇa to Uddhava Niyama Pāpa

- **Niyama** **Pāpa** The wicked (khalas) who delight in violence perform ālambhana on animals (kill them) for their own pleasure alone, and with them perform yajñas and worship the devas, the pitṛ-devatās and the lords of beings (Bhāg. 11.21.30).

Śrīmad Bhāgavatam › Ekādaśa Skandha › Adhyāya 21 › Śloka 30 **Niyama** **Pāpa** Bhāg. 11.21.30

हिंसाविहारा ह्यालब्धैः पशुभिः स्वसुखेच्छया ।
यजन्ते देवता यज्ञैः पितॄन् भूतपतीन् खलाः ॥

↩ **Back:** ↩ C.37

C.38 Piṇḍa-dāna forbidden for great sinners and for violent offenders sentenced to death

Speaker / narration: Brahmā to Bhārgava (the rāja-dharma section of Śānti. 14) Niyama Pāpa

- **Niyama** In the context of punishment it is said that persons of the three varṇas who have been mutilated (as punishment) are to be made to live with the caṇḍālas, and that when such people become pretas, no one should give them piṇḍa-dāna (Śānti. 14.101–102).
- **Niyama** **Pāpa** A violent offender who does not come to the assembly even when summoned by royal command, who takes refuge with a powerful man and stands armed, and who is defeated, is to be conquered by punishment, separated from his body and from all his possessions, and sent to the other world; no one should give piṇḍa-dāna even to him after his death; whoever gives it must pay the fine called ‘madhyamaṃ pūrvasāhasam’ (Śānti. 14.110–112).

Mahābhārata › Śāntiparva › Rājadharmaparva › Adhyāya 14, Śloka 101 **Niyama** KK 12-1-14-101

विकलेन्द्रियांस्त्रिवर्णांश्च चण्डालैः सह वासयेत् ।
तैश्च यः सम्पिबेत्कश्चित्स पिबन्ब्रह्महा भवेत् ॥

↩ **Back:** ↩ C.38

Mahābhārata › Śāntiparva › Rājadharmaparva › Adhyāya 14, Śloka 102 **Niyama** KK 12-1-14-102

प्रेतानां न च देयानि पिण्डदानानि केनचित् ॥

↩ **Back:** ↩ C.38

Mahābhārata › Śāntiparva › Rājadharmaparva › Adhyāya 14, Śloka 110 **Niyama** **Pāpa** KK 12-1-14-110

राजाज्ञया समाहूतो यो न गच्छेत्सभां नरः ।
बलवन्तमुपाश्रित्य सायुधः स पराजितः ॥

↩ **Back:** ↩ C.38

Mahābhārata › Śāntiparva › Rājadharmaparva › Adhyāya 14, Śloka 111 **Niyama** **Pāpa** KK 12-1-14-111

तं दण्डेन विनिर्जित्य महासाहसिकं नरम् ।
वियुक्तदेहसर्वस्वं परलोकं विसर्जयेत् ॥

↩ **Back:** ↩ C.38

Mahābhārata › Śāntiparva › Rājadharmaparva › Adhyāya 14, Śloka 112 **Niyama** **Pāpa** KK 12-1-14-112

मृतस्यापि न देयानि पिण्डदानानि केनचित् ।
दत्त्वा दण्डं प्रयच्छेत मध्यमं पूर्वसाहसम् ॥

↩ **Back:** ↩ C.38

(D) The puṇya and sadgati gained by performing as enjoined

The puṇya gained by the performer

D.1 Worship of the three gurus: mother, father and teacher; when the gurus are worshipped, the ṛṣis and devas, together with the pitṛ-devatās, are pleased

Speaker / narration: Bhīṣma to Dharmarāja (in chapter 129, Yama to Gautama) Niyama Pāpa Puṇya

- **Niyama** Bhīṣma said that worship of mother, father and teachers is what he holds most dear, and that one devoted to it attains the worlds and great fame (Śānti. 108.3).
- **Niyama** They are the three worlds, the three āśramas, the three Vedas and the three fires; the father is the gārhapatya fire, the mother the dakṣiṇa fire, and the teacher the āhavanīya fire (Śānti. 108.6–7).
- **Puṇya** If you are not negligent toward these three, you will conquer the three worlds: this world by serving your father, the world beyond by serving your mother, and Brahma-loka by serving your teacher (Śānti. 108.8–9).
- **Pāpa** **Puṇya** One who honours these three has honoured all the worlds; all the rites of one who disregards these three become fruitless (Śānti. 108.12).
- **Pāpa** For one by whom these three gurus are not always honoured, there is neither this world nor the next, nor fame (Śānti. 108.13).
- **Puṇya** By the deed that pleases the father, Prajāpati is pleased; by the deed that pleases the mother, Bhūdevī (the Earth) is worshipped (Śānti. 108.25).
- **Puṇya** When the gurus are worshipped, the ṛṣis and devas, together with the pitṛ-devatās, are pleased; therefore the guru is most worthy of worship (Śānti. 108.27).
- **Pāpa** A son born of them who does not support the parents who supported him incurs a sin greater than killing an embryo; there is no greater sinner in the world (Śānti. 108.31).
- **Niyama** When Gautama asked by what deed one is freed from the debt to one's parents, Yama said one should live by tapas, purity, truth and dharma and worship one's parents every day (Śānti. 129.9–10).

Mahābhārata › Śāntiparva › Rājadharmaparva › Adhyāya 108, Śloka 3 **Niyama** KK 12-1-108-3

मातापित्रोर्गुरूणां च पूजा बहुमता मम ।
अत्र वर्तन्नरो लोकान्यशश्च महदश्नुते ॥

↩ **Back:** ↩ D.1

Mahābhārata › Śāntiparva › Rājadharmaparva › Adhyāya 108, Śloka 6 **Niyama** KK 12-1-108-6

एत एव त्रयो लोका एत एवाश्रमास्त्रयः ।
एत एव त्रयो वेदा एत एव त्रयोऽग्नयः ॥

↩ **Back:** ↩ A.0 · Pitṛ-devatās ↩ D.1

Mahābhārata › Śāntiparva › Rājadharmaparva › Adhyāya 108, Śloka 7 **Niyama** KK 12-1-108-7

पिता वै गार्हपत्योऽग्निर्माताऽग्निर्दक्षणः स्मृतः ।
गुरुराहवनीयस्तु साऽग्नित्रेता गरीयसी ॥

↩ **Back:** ↩ A.0 · Pitṛ-devatās ↩ D.1

Mahābhārata › Śāntiparva › Rājadharmaparva › Adhyāya 108, Śloka 8 **Puṇya** KK 12-1-108-8

त्रिष्वप्रमाद्यन्नेतेषु त्रींल्लोकानपि जेष्यसि ।
पितृवृत्त्या त्विमं लोकं मातृवृत्त्या तथा परम् ॥

↩ **Back:** ↩ A.0 · Pitṛ-devatās ↩ D.1

Mahābhārata › Śāntiparva › Rājadharmaparva › Adhyāya 108, Śloka 9 **Puṇya** KK 12-1-108-9

ब्रह्मलोकं गुरोर्वृत्त्या नियमेन तरिष्यसि ।
सम्यगेतेषु वर्तस्व त्रिषु लोकेषु भारत ॥

↩ **Back:** ↩ A.0 · Pitṛ-devatās ↩ D.1

Mahābhārata › Śāntiparva › Rājadharmaparva › Adhyāya 108, Śloka 12 **Pāpa** **Puṇya** KK 12-1-108-12

सर्वे तस्यादृता लोका यस्यैते त्रय आदृताः ।
अनादृतास्तु यस्यैते सर्वास्तस्याफलाः क्रियाः ॥

↩ **Back:** ↩ A.0 · Pitṛ-devatās ↩ D.1

Mahābhārata › Śāntiparva › Rājadharmaparva › Adhyāya 108, Śloka 13 **Pāpa** KK 12-1-108-13

न चायं न परो लोको न यशस्तस्य भारत ।
अमानिता नित्यमेव यस्यैते गुरवस्त्रयः ॥

↩ **Back:** ↩ A.0 · Pitṛ-devatās ↩ D.1

Mahābhārata › Śāntiparva › Rājadharmaparva › Adhyāya 108, Śloka 25 **Puṇya** KK 12-1-108-25

येन प्रीणन्ति पितरस्तेन प्रीतः प्रजापतिः ।
प्रीणाति जननी येन पृथिवी तेन पूजिता ॥

↩ **Back:** ↩ D.1

Mahābhārata › Śāntiparva › Rājadharmaparva › Adhyāya 108, Śloka 27 **Puṇya** KK 12-1-108-27

ऋषयश्च हि देवाश्च प्रीयन्ते पितृभिः सह ।
पूज्यमानेषु गुरुषु तस्मात्पूज्यतमो गुरुः ॥

↩ **Back:** ↩ A.0 · Pitṛ-devatās ↩ D.1

Mahābhārata › Śāntiparva › Rājadharmaparva › Adhyāya 108, Śloka 31 **Pāpa** KK 12-1-108-31

भृतो भर्तारं यो न बिभर्ति पुत्रः स्वयोनिजः पितरं मातरं च ।
तस्य पापं भ्रूणहत्याविशिष्टं तस्मान्नान्यः पापकृदस्ति लोके ॥

↩ **Back:** ↩ D.1

Mahābhārata › Śāntiparva › Rājadharmaparva › Adhyāya 129, Śloka 9 **Niyama** KK 12-1-129-9

मातापितृभ्यामानृण्यं किं कृत्वा समवाप्नुयात् ।
कथं च लोकानाप्नोति पुरुषो दुर्लभाञ्शुभान् ॥

↩ **Back:** ↩ A.0 · Pitṛ-devatās ↩ D.1

Mahābhārata › Śāntiparva › Rājadharmaparva › Adhyāya 129, Śloka 10 **Niyama** KK 12-1-129-10

तपः शौचवता नित्यं सत्यधर्मरतेन च ।
मातापित्रोरहरहः पूजनं कार्यमञ्जसा ॥

↩ **Back:** ↩ A.0 · Pitṛ-devatās ↩ D.1

D.2 No yajña equals service to one's father — the highest worlds for those devoted to serving their parents

Speaker / narration: Śrī Rāma to Sītā Devī (Niyama) (Puṇya)

- **Niyama** Passing over mother, father and guru, who are within one's reach, how can one worship in any way the deity who is not within one's reach? These three are the three worlds; there is nothing else on earth as sacred as they (Rām. Ayo. 30.33–34).
- **Niyama** Neither truth, nor charity, nor honour, nor yajñas with dakṣiṇā give such strength as service to one's father (Rām. Ayo. 30.35).
- **Puṇya** For one who follows the service of his elders, nothing is hard to obtain — svarga, wealth, grain, learning, sons or happiness (Rām. Ayo. 30.36).
- **Puṇya** Great souls devoted to serving their mother and father attain the worlds of the devas, the gandharvas and the cows, the world of Brahmā, and other worlds (Rām. Ayo. 30.37).

Śrīmad Rāmāyaṇa › Ayodhyākāṇḍa › Sarga 30 › Śloka 33 **Niyama** Vā.Rā. 2.30.33

अस्वाधीनं कथं दैवं प्रकारैरभिराध्यते ।
स्वाधीनं समतिक्रम्य मातरं पितरं गुरुम् ॥

↩ **Back:** ↩ D.2

Śrīmad Rāmāyaṇa › Ayodhyākāṇḍa › Sarga 30 › Śloka 34 **Niyama** Vā.Rā. 2.30.34

यत्र त्रयं त्रयो लोकाः पवित्रं तत्समं भुवि ।
नान्यदस्ति शुभापाङ्गे तेनेदमभिराध्यते ॥

↩ **Back:** ↩ D.2

Śrīmad Rāmāyaṇa › Ayodhyākāṇḍa › Sarga 30 › Śloka 35 **Niyama** Vā.Rā. 2.30.35

न सत्यं दानमानौ वा यज्ञो वाप्याप्तदक्षिणाः ।
तथा बलकराः सीते यथा सेवा पितुर्मता ॥

↩ **Back:** ↩ A.0 · Pitṛ-devatās ↩ D.2

Śrīmad Rāmāyaṇa › Ayodhyākāṇḍa › Sarga 30 › Śloka 36 **Puṇya** Vā.Rā. 2.30.36

स्वर्गो धनं वा धान्यं वा विद्या पुत्राः सुखानि च ।
गुरुवृत्त्यनुरोधेन न किंचिदपि दुर्लभम् ॥

↩ **Back:** ↩ D.2

Śrīmad Rāmāyaṇa › Ayodhyākāṇḍa › Sarga 30 › Śloka 37 **Puṇya** Vā.Rā. 2.30.37

देवगन्धर्वगोलोकान् ब्रह्मलोकांस्तथापरान् ।
प्राप्नुवन्ति महात्मानो मातापितृपरायणाः ॥

↩ **Back:** ↩ A.0 · Pitṛ-devatās ↩ D.2

D.3 The fruit of the pitṛ-medha — long life, offspring, svarga

Speaker / narration: Maheśvara to Umādevī Niyama Puṇya

- **Niyama** **Puṇya** This, told in brief, is the eternal pitṛ-yajña; by it the pitṛs are satisfied and the performer obtains the fruit (Anu. 238.33).
- **Niyama** It should be performed every day, or every month, or twice or four times a year, according to one's capacity (Anu. 238.34).
- **Puṇya** From the pitṛ-medha come long life, health, sons, many servants and abundant wealth and grain (Anu. 238.35).
- **Puṇya** The giver of śrāddha thereafter attains svarga, which is pure, of many forms, resounding with hosts of apsarās and free of rajas (Anu. 238.36).
- **Puṇya** To the learned who perform śrāddhas desiring nourishment, the pitṛs always grant nourishment and offspring (Anu. 238.37).
- **Puṇya** The wise say that śrāddha brings blessedness, fame, long life and svarga, destroys enemies and sustains the family (Anu. 238.38).

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 238, Śloka 33 **Niyama** **Puṇya** KK 13-1-238-33

एष प्रोक्तः समासेन पितृयज्ञः सनातनः ।
पितरस्तेन तुष्यन्ति कर्ता च फलमाप्नुयात् ॥

↩ **Back:** ↩ D.3

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 238, Śloka 34 **Niyama** KK 13-1-238-34

अहन्यहनि वा कुर्यान्मासे मासेऽथवा पुनः ।
संवत्सरं द्विः कुर्याच्च चतुर्वाऽपि स्वशक्तितः ॥

↩ **Back:** ↩ D.3

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 238, Śloka 35 **Puṇya** KK 13-1-238-35

दीर्घायुश्च भवेत्स्वस्थः पितृमेधेन वा पुनः ।
सपुत्रो बहुभृत्यश्च प्रभूतधनधान्यवान् ॥

↩ **Back:** ↩ A.2 · Sadgati ↩ D.3

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 238, Śloka 36 **Puṇya** KK 13-1-238-36

श्राद्धदः स्वर्गमाप्नोति निर्मलं विविधात्मकम् ।
अप्सरोगणसङ्घुष्टं विरजस्कमनन्तरम् ॥

↩ **Back:** ↩ A.2 · Sadgati ↩ D.3

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 238, Śloka 37 **Puṇya** KK 13-1-238-37

श्राद्धानि पुष्टिकामा वै ये प्रकुर्वन्ति पण्डिताः ।
तेषां पुष्टिं प्रजां चैव दास्यन्ति पितरः सदा ॥

↩ **Back:** ↩ A.0 · Pitṛ-devatās ↩ A.2 · Sadgati ↩ D.3

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 238, Śloka 38 **Puṇya** KK 13-1-238-38

धन्यं यशस्यमायुष्यं स्वर्ग्यं शत्रुविनाशनम् ।
कुलसन्धारकं चेति श्राद्धमाहुर्मनीषिणः ॥

↩ **Back:** ↩ D.3

D.4 The puṇya that accrues to the performer from worship of the pitṛs

Speaker / narration: Bhīṣma to Yudhiṣṭhira (110, 65); Śrī Bhagavān (210) Puṇya

- **Puṇya** Those who, desiring offspring, perform śrāddhas with a pure mind on every tithi cross over difficulties hard to overcome (Śānti. 110.20).
- **Puṇya** A king who performs on a large scale the daily rites (āhnika), the pitṛ-yajñas, the bhūta-yajñas and the manuṣya-yajñas obtains the fruit of the vānaprastha āśrama (Śānti. 65.10).

Mahābhārata › Śāntiparva › Rājadharmaparva › Adhyāya 110, Śloka 20 **Puṇya** KK 12-1-110-20

ये च श्राद्धानि कुर्वन्ति तिथ्यांतिथ्यां प्रजार्थिनः ।
सुविशुद्धेन मनसा दुर्गाण्यतितरन्ति ते ॥

↩ **Back:** ↩ D.4

Mahābhārata › Śāntiparva › Rājadharmaparva › Adhyāya 65, Śloka 10 **Puṇya** KK 12-1-65-10

- **Niyama** Janaka told Daśaratha to have the go-dāna (gift of cows) performed for Rāma and Lakṣmaṇa, perform the pitṛ-kārya as well, and only then celebrate the wedding (Rām. Bāla. 71.23).
- **Niyama** Janaka said that today was the Maghā nakṣatra, that the wedding should be held on the third day under the Uttara Phalgunī nakṣatra, and that gifts bringing happiness should be made for Rāma and Lakṣmaṇa (Rām. Bāla. 71.24).
- **Example** Daśaratha said to Janaka, ‘We shall go to our lodging and duly perform the śrāddha rites’; reaching his lodging, he performed the śrāddha according to the procedure, and the next morning made an excellent go-dāna (Rām. Bāla. 72.19; 72.21).

Śrīmad Rāmāyaṇa › Bālakāṇḍa › Sarga 71 › Śloka 23 **Niyama** Vā.Rā. 1.71.23

रामलक्ष्मणयो राजन् गोदानं कारयस्व ह ।
पितृकार्यं च भद्रं ते ततो वैवाहिकं कुरु ॥

↩ **Back:** ↩ E.35

Śrīmad Rāmāyaṇa › Bālakāṇḍa › Sarga 71 › Śloka 24 **Niyama** Vā.Rā. 1.71.24

मघा ह्यद्य महाबाहो तृतीयदिवसे प्रभो ।
फल्गुन्यामुत्तरे राजंस्तस्मिन् वैवाहिकं कुरु ।
रामलक्ष्मणयोरर्थे दानं कार्यं सुखोदयम् ॥

↩ **Back:** ↩ E.35

Śrīmad Rāmāyaṇa › Bālakāṇḍa › Sarga 72 › Śloka 19 **Example** Vā.Rā. 1.72.19

स्वस्ति प्राप्नुहि भद्रं ते गमिष्यामः स्वमालयम् ।
श्राद्धकर्माणि विधिवद्विधास्य इति चाब्रवीत् ॥

↩ **Back:** ↩ E.35

Śrīmad Rāmāyaṇa › Bālakāṇḍa › Sarga 72 › Śloka 21 **Example** Vā.Rā. 1.72.21

स गत्वा निलयं राजा श्राद्धं कृत्वा विधानतः ।
प्रभाते काल्यमुत्थाय चक्रे गोदानमुत्तमम् ॥

↩ **Back:** ↩ E.35 ↩ Index.63

E.36 Śrāddhas after completing the hearing of the Bhārata

Speaker / narration: Vaiśampāyana to Janamejaya (the fruit of hearing the Bhārata) Niyama

- **Niyama** After hearing this itihāsa in due order, with self-restraint and in purity, and completing it, one should offer śrāddhas to brāhmaṇas, according to one’s capacity and with devotion, in honour of those spoken of in it (Svargā. 6.11–12).

Mahābhārata › Svargārohaṇaparva › › Adhyāya 6, Śloka 11 **Niyama** KK 18-1-6-11

इतिहासमिमं श्रुत्वा यथावदनुपूर्वशः ।
संयतात्मा शुचिर्भूत्वा पारं गत्वा च भारते ॥

↩ **Back:** ↩ E.36

Mahābhārata › Svargārohaṇaparva › › Adhyāya 6, Śloka 12 **Niyama** KK 18-1-6-12

तेषां श्राद्धानि देयानि श्रुत्वा भारत भारतम् ।
ब्राह्मणेभ्यो यथाशक्त्या भक्त्या च भरतर्षभ ॥

↩ **Back:** ↩ E.36

E.37 The Rāmāyaṇa should be recited at śrāddhas

Speaker / narration: Maharṣi Vālmīki (phalaśruti) Niyama Puṇya

- **Niyama** The Rāmāyaṇa is equal to the Veda; a wise man should have it recited at śrāddhas (Rām. Uttara. 111.4).
- **Puṇya** This narrative grants long life and good fortune and destroys pāpas (Rām. Uttara. 111.4).

Śrīmad Rāmāyaṇa › Uttarakāṇḍa › Sarga 111 › Śloka 4 **Niyama** **Puṇya** Vā.Rā. 7.111.4

इदमाख्यानमायुष्यं सौभाग्यं पापनाशनम् ।
रामायणं वेदसमं श्राद्धेषु श्रावयेद् बुधः ॥

↩ **Back:** ↩ A.2 · Sadgati ↩ E.37 ↩ E.37

E.38 Expiation for a brāhmaṇa who has eaten śrāddha food or food of the dead

Speaker / narration: Bhīṣma to Yudhiṣṭhira Niyama Pāpa

- Niyama Yudhiṣṭhira asked to be told the expiations for brāhmaṇas in accepting havya and kavya and in various foods (Anu. 199.2).
- Niyama Pāpa One who accepts footwear and an umbrella at the aurdhvadehika is freed from that pāpa by doing japa a hundred times with concentration (Anu. 199.10).
- Niyama Pāpa If one accepts at a gift of land, or during a graha (eclipse) or a sūtaka, one is freed from pāpa by fasting for three nights (Anu. 199.11).
- Niyama Pāpa A dvija who has eaten pitṛ-śrāddha food in the kṛṣṇa-pakṣa becomes pure after a day and a night; during that time he should not perform sandhyopāsana or japa, and should not mix that food; then he becomes pure (Anu. 199.12–13).
- Niyama It is for this reason that the śrāddha of the pitṛs is prescribed in the aparāhṇa — the brāhmaṇas invited beforehand eat then (Anu. 199.14).
- Niyama Pāpa A brāhmaṇa who has eaten food on the third day after a death bathes three times and becomes pure in twelve days; after twelve days he performs purification, gives havis to brāhmaṇas and is freed from that pāpa (Anu. 199.15–16).
- Niyama Concerning the ten nights after a death (daśarātreṇa), one should have these expiations performed: the Sāvitrī, the Raivatī iṣṭi, the Kūṣmāṇḍa and the Aghamarṣaṇa (Anu. 199.17).
- Niyama Pāpa One who has eaten during the (specified) three-night period after a death becomes pure by performing the triṣavaṇa bath (bathing at the three junctures of the day) for seven days; he attains great siddhi and meets with no calamity (Anu. 199.18–19).

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 199, Śloka 2 Niyama KK 13-1-199-2

ब्राह्मणानां विशेषेण हव्यकव्यप्रतिग्रहे ।
नानाविधेषु भोज्येषु प्रायश्चित्तानि शंस मे ॥

↩ Back: ↩ E.38

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 199, Śloka 10 Niyama Pāpa KK 13-1-199-10

उपानहौ च च्छत्रं च प्रतिगृह्यौर्ध्वदेहिके ।
जपेच्छतं समायुक्तस्तेन मुच्येत पाप्मना ॥

↩ Back: ↩ E.38

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 199, Śloka 11 Niyama Pāpa KK 13-1-199-11

क्षेत्रप्रतिग्रहे चैव ग्रहसूतकयोस्तथा ।
त्रीणि रात्राण्युपोषित्वा तेन पापाद्विमुच्यते ॥

↩ Back: ↩ E.38

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 199, Śloka 12 Niyama Pāpa KK 13-1-199-12

कृष्णपक्षे तु यः श्राद्धं पितृणामश्नुते द्विजः ।
अन्नमेतदहोरात्रात्पूतो भवति ब्राह्मणः ॥

↩ Back: ↩ E.38

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 199, Śloka 13 Niyama Pāpa KK 13-1-199-13

न च सन्ध्यामुपासीत न च जाप्यं प्रवर्तयेत् ।
न सङ्किरेत्तदन्नं च ततः पूयेत ब्राह्मणः ॥

↩ Back: ↩ E.38

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 199, Śloka 14 **Niyama** KK 13-1-199-14

इत्यर्थमपराह्णे तु पितॄणां श्राद्धमुच्यते ।
यथोक्तानां यदश्नीयुर्ब्राह्मणाः पूर्वकेतिताः ॥

↩ **Back:** ↩ E.38

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 199, Śloka 15 **Niyama** **Pāpa** KK 13-1-199-15

मृतकस्य तृतीयाहे ब्राह्मणो योऽन्नमश्नुते ।
स त्रिवेलं समुन्मज्ज्य द्वादशाहेन शुध्यति ॥

↩ **Back:** ↩ E.38

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 199, Śloka 16 **Niyama** **Pāpa** KK 13-1-199-16

द्वादशाहे व्यतीते तु कृतशौचो विशेषतः ।
ब्राह्मणेभ्यो हविर्दत्त्वा मुच्यते तेन पाप्मना ॥

↩ **Back:** ↩ E.38

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 199, Śloka 17 **Niyama** KK 13-1-199-17

मृतस्य दशरात्रेण प्रायश्चित्तानि दापयेत् ।
सावित्रीं रैवतीमिष्टिं कूश्माण्डमघमर्षणम् ॥

↩ **Back:** ↩ E.38

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 199, Śloka 18 **Niyama** **Pāpa** KK 13-1-199-18

मृतकस्य त्रिरात्रे यः समुद्दिष्टे समश्नुते ।
सप्तत्रिषवणं स्नात्वा पूतो भवति ब्राह्मणः ॥

↩ **Back:** ↩ E.38

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 199, Śloka 19 **Niyama** **Pāpa** KK 13-1-199-19

सिद्धिमाप्नोति विपुलामापदं चैव नाप्नुयात् ॥

↩ **Back:** ↩ E.38

(b) Tila-tarpaṇa, udaka-dāna, svadhā

E.39 Pitṛ-tarpaṇa at a river — the order, and offering water from a boat

Speaker / narration: Bhīṣma to Yudhiṣṭhira Niyama Puṇya

- **Niyama** While crossing water one should remember the names of one's grandfathers; on reaching a river one should offer pitṛ-tarpaṇa to the pitṛs (Anu. 139.16).
- **Niyama** First one should offer tarpaṇa with water to those of one's own lineage, and then give handfuls of water to friends and the circle of relatives (Anu. 139.17).
- **Niyama** The pitṛs long for (water) from one who crosses water with a pair of spotted bulls and from one who boards a boat; those who know this always give water with concentration while they are in a boat (Anu. 139.18–19).
- **Niyama** **Puṇya** In the half-month called the kṛṣṇa-pakṣa one should make the nirvapaṇas (offerings of piṇḍas); through devotion to the pitṛs come prosperity, long life, vigour and wealth (Anu. 139.19–20).

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 139, Śloka 16 **Niyama** KK 13-1-139-16

जलं प्रतरमाणश्च कीर्तयेत पितामहान् ।
नदीमासाद्य कुर्वीत पितॄणां पितृतर्पणम् ॥

↩ **Back:** ↩ E.39

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 139, Śloka 17 **Niyama** KK 13-1-139-17

पूर्वं स्ववंशजानां तु कृत्वाऽद्भिस्तर्पणं पुनः ।
सुहृत्सम्बन्धिवर्गाणां ततो दद्याज्जलाञ्जलिम् ॥

↩ **Back:** ↩ E.39

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 139, Śloka 18 **Niyama** KK 13-1-139-18

कल्माषगोयुगेनाथ युक्तेन तरतो जलम् ।
पितरोऽभिलषन्ते वै नावं चाप्यधिरोहिताः ॥

↩ **Back:** ↩ E.39

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 139, Śloka 19 **Niyama** **Puṇya** KK 13-1-139-19

सदा नावि जलं तज्ज्ञाः प्रयच्छन्ति समाहिताः ।
मासार्धे कृष्णपक्षस्य कुर्यान्निर्वपणानि वै ॥

↩ **Back:** ↩ E.39 ↩ E.39

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 139, Śloka 20 **Niyama** **Puṇya** KK 13-1-139-20

पुष्टिरायुस्तथा वीर्यं श्रीश्चैव पितृभक्तितः ॥

↩ **Back:** ↩ E.39

E.40 Tilodaka mixed with honey from an audumbara vessel on amāvāsyā

Speaker / narration: The pitṛ-devatās to a divine messenger — as Bhīṣma told Yudhiṣṭhira Niyama Puṇya

- **Niyama** **Puṇya** Those who on amāvāsyā hold an audumbara (cluster fig) vessel and give tilodaka mixed with honey have truly performed śrāddha together with its secret (Anu. 188.78).
- **Puṇya** Their offspring are always happy and well-nourished; growth of family and lineage is the fruit for the giver of piṇḍas; one who performs it with śraddhā becomes free of the debt to the pitṛs (Anu. 188.79).
- **Niyama** Thus the order of the time of śrāddha, its procedure, the recipient and the fruit have been duly told (Anu. 188.80).

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 188, Śloka 78 **Niyama** **Puṇya** KK 13-1-188-78

अमावास्यां तु ये मर्त्याः प्रयच्छन्ति तिलोदकम् ।
पात्रमौदुम्बरं गृह्य मधुमिश्रं तपोधन ।
कृतं भवति तैः श्राद्धं सरहस्यं यथार्थवत् ॥

↩ **Back:** ↩ A.2 · Sadgati ↩ E.40

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 188, Śloka 79 **Puṇya** KK 13-1-188-79

हृष्टपुष्टमनास्तेषां प्रजा भवति नित्यदा ।
कुलवंशस्य वृद्धिस्तु पिण्डदस्य फलं भवेत् ।
श्रद्दधानस्तु यः कुर्यात्पितॄणामनृणो भवेत् ॥

↩ **Back:** ↩ A.2 · Sadgati ↩ E.40

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 188, Śloka 80 **Niyama** KK 13-1-188-80

एवमेव समुद्दिष्टः श्राद्धकालक्रमस्तथा ।
विधिः पात्रं फलं चैव यथावदनुकीर्तितम् ॥

↩ **Back:** ↩ E.40

E.41 The tīrthas of the hand — the pitṛ-tīrtha

Speaker / narration: Nārada to Mārkaṇḍeya Niyama Puṇya

- Niyama In the human hand there are five tīrthas: deva, ṛṣi, pitṛ, brāhma (in the middle) and vaiṣṇava (Anu. 59.25).
- Niyama Puṇya Of these the vaiṣṇava portion is the first; if one performs ācamana there, the family of people of all four varṇas prospers, and the rites for the pitṛs and the devas flourish in this world and the next (Anu. 59.26).

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 59, Śloka 25 Niyama KK 13-1-59-25

देवर्षिपितृतीर्थानि ब्राह्मं मध्येऽथं वैष्णवम्।
नृणां तीर्थानि पञ्चाहुः पाणौ सन्निहितानि वै॥

↩ Back: ↩ E.41

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 59, Śloka 26 Niyama Puṇya KK 13-1-59-26

आद्यतीर्थं तु तीर्थानां वैष्णवो भाग उच्यते।
यत्रोपस्पृश्य वर्णानां चतुर्णां वर्धते कुलम्।
पितृदैवतकार्याणि वर्धन्ते प्रेत्य चेह च॥

↩ Back: ↩ E.41

E.42 A copper vessel for tilodaka

Speaker / narration: The devas (to the ṛṣis; a secret dharma told by Bhīṣma) Niyama Pāpa

- Niyama In fasting and in bali offerings a copper vessel is best; bali, alms, arghya and tilodaka (sesame-water) for the pitṛ-devatās — all these should be given with a copper vessel (Anu. 189.21–22).
- Pāpa Otherwise the fruit is less (Anu. 189.22).

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 189, Śloka 21 Niyama KK 13-1-189-21

उपवासे बलौ चापि ताम्रपात्रं विशिष्यते।
बलिर्भिक्षा तथाऽर्घ्यं च पितॄणां च तिलोदकम्।।

↩ Back: ↩ A.4 · Niyama ↩ E.42

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 189, Śloka 22 Niyama Pāpa KK 13-1-189-22

ताम्रपात्रेण दातव्यमन्यथाऽल्पफलं भवेत्।
गुह्यमेतत्समुद्दिष्टं यथा तुष्यन्ति देवताः॥

↩ Back: ↩ A.4 · Niyama ↩ E.42 ↩ E.42

(c) Preta-karma — cremation, the water rite, the ten-day rites, aśauca

E.43 The procedure at the time of death and for cremation; udaka and the aṣṭakā-śrāddha

Speaker / narration: Maheśvara to the goddess Umā Niyama Puṇya

- Niyama Śiva told of the rite to be performed for the dead after a natural death; the body of a person about to die should be laid on the ground (Anu. 242.27–28).
- Niyama As soon as life departs, the body should be covered with a cloth and adorned with garlands of flowers, sandal-paste and gold (Anu. 242.29).
- Niyama The dead body should be cremated in the funeral fire in the southern part of the cremation ground; or else the lifeless body should be laid in the earth (Anu. 242.30).
- Niyama For those who die, daytime, the śukla-pakṣa and the uttarāyaṇa are auspicious; what is contrary to these is censured (Anu. 242.31).
- Niyama Puṇya The gift of udaka performed by many together, and the aṣṭakā-śrāddha, bring nourishment and well-being to the dead in the other world (Anu. 242.32).

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 242, Śloka 27 Niyama KK 13-1-242-27

स्वभावं मरणं नाम न तु चात्मेच्छया भवेत् ।
यथा मृतानां यत्कार्यं तन्मे शृणु यथाविधि ॥

↩ Back: ↩ E.43

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 242, Śloka 28 Niyama KK 13-1-242-28

तत्रापि मरणं त्यागो मूढत्यागाद्विशिष्यते ।
भूमौ संवेशयेद्देहं नरस्य विनशिष्यतः ॥

↩ Back: ↩ E.43

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 242, Śloka 29 Niyama KK 13-1-242-29

निर्जीवं वृणुयात्सद्यो वाससा तु कलेवरम् ।
माल्यगन्धैरलङ्कृत्य सुवर्णेन च भामिनि ॥

↩ Back: ↩ E.43

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 242, Śloka 30 Niyama KK 13-1-242-30

श्मशाने दक्षिणे देशे चिताग्नौ प्रदहेन्मृतम् ।
अथवा निक्षिपेद्भूमौ शरीरं जीववर्जितम् ॥

↩ Back: ↩ E.43

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 242, Śloka 31 Niyama KK 13-1-242-31

दिवा च शुक्लपक्षश्च उत्तरायणमेव च ।
मुमूर्षूणां प्रशस्तानि विपरीतं तु गर्हितम् ॥

↩ Back: ↩ E.43

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 242, Śloka 32 Niyama Puṇya KK 13-1-242-32

औदकं चाष्टकाश्राद्धं बहुभिर्बहुभिः कृतम् ।
आप्यायनं मृतानां तत्परलोके भवेच्छुभम् ।
एतत्सर्वं मया प्रोक्तं मानुषाणां हितं वचः ॥

↩ Back: ↩ A.4 · Niyama ↩ E.43

E.44 Rules on food during aśauca, cremation and piṇḍa-dāna

Speaker / narration: Vyāsa to Yudhiṣṭhira (35); Bhīṣma to Yudhiṣṭhira (59); Parāśara to Janaka (303) Niyama

- **Niyama** One must not eat preta-food, food of a house in sūtaka, or any food over which ten days have not passed (anirdaśa); nor should one drink the milk of a cow that has not passed ten days after calving (Śānti. 35.26).
- **Niyama** (The master) should give the piṇḍa (to a śūdra servant) who has no offspring; he should support the aged and the weak; the śūdra, for his part, must not abandon his master in any calamity (Śānti. 59.38).
- **Niyama** For one who has died in the house, it is commended to carry him out, take him to the cremation ground by a vehicle, and cremate him according to the injunctions in a pure place (Śānti. 303.38).

Mahābhārata › Śāntiparva › Rājadharmaparva › Adhyāya 35, Śloka 26 **Niyama** KK 12-1-35-26

प्रेतान्नं सूतकान्नं च यच्च किञ्चिदनिर्दशम्।
अभोज्यं चाप्यपेयं च धेनोर्दुग्धमनिर्दशम्॥

↩ **Back:** ↩ E.44

Mahābhārata › Śāntiparva › Rājadharmaparva › Adhyāya 59, Śloka 38 **Niyama** KK 12-1-59-38

देयः पिण्डोऽनपत्याय भर्तव्यौ वृद्धदुर्बलौ।
शूद्रेण तु न हातव्यो भर्ता कस्याञ्चिदापदि॥

↩ **Back:** ↩ E.44

Mahābhārata › Śāntiparva › Mokṣadharmaparva › Adhyāya 303, Śloka 38 **Niyama** KK 12-3-303-38

गृहेषु येषामसवः पतन्ति तेषामथो निर्हरणं प्रशस्तम्।
यानेन वै प्रापणं च श्मशाने शुचौ देशे विधिना चैव दाहः॥

↩ **Back:** ↩ A.4 · Niyama ↩ E.44

E.45 Vedic mantra rites exist even for the dead — the argument of Syūmaraśmi

Speaker / narration: Syūmaraśmi to Kapila (a dialogue told by Bhīṣma to Yudhiṣṭhira) Niyama

- **Niyama** Syūmaraśmi argues that (after death) cremation, feeding worthy recipients, the gift of cows or other animals, and releasing the piṇḍas into water — these too are done with mantras (Śānti. 275.14). The meaning of some words in this śloka is unclear.
- **Niyama** The pitṛs called Arciṣmantas, Barhiṣadas and Kravyādas accept mantras even in the case of the dead; the mantras are the cause (Śānti. 275.15).
- **Niyama** Syūmaraśmi asked: when human beings are indebted to the pitṛs, the devas and the twice-born, and the Vedas proclaim this, who can attain mokṣa, and how? (Śānti. 275.16).

Mahābhārata › Śāntiparva › Mokṣadharmaparva › Adhyāya 275, Śloka 14 **Niyama** KK 12-3-275-14

दाहे पुनः संश्रयणे संश्रिते पात्रभोजने।
दानं गवां पशूनां वा पिण्डानामप्सु मज्जनम्॥

↩ **Back:** ↩ E.45

Mahābhārata › Śāntiparva › Mokṣadharmaparva › Adhyāya 275, Śloka 15 **Niyama** KK 12-3-275-15

अर्चिष्मन्तो बर्हिषदः क्रव्यादाः पितरस्तथा।
मृतस्याप्यनुमन्यन्ते मन्त्रा मन्त्राश्च कारणम्॥

↩ **Back:** ↩ E.45

Mahābhārata › Śāntiparva › Mokṣadharmaparva › Adhyāya 275, Śloka 16 **Niyama** KK 12-3-275-16

एवं क्रोशत्सु वेदेषु कुतो मोक्षोऽस्ति कस्यचित्।
ऋणवन्तो यदा मर्त्याः पितृदेवद्विजातिषु॥

↩ **Back:** ↩ E.45

E.46 Preta rites should be performed for all the slain, in due order

Speaker / narration: Sañjaya to Dhṛtarāṣṭra Niyama

- **Niyama** Sañjaya told Dhṛtarāṣṭra to have all the preta rites performed, in due order, for everyone who died in the war — fathers, sons, grandsons, kinsmen, friends, gurus and other followers (Strī. 1.8); the king was told again to have preta rites performed, in due order, for all — sons, grandsons and fathers (Strī. 8.7).

Mahābhārata › Strīparva › Jalaprādānikaparva › Adhyāya 1, Śloka 8 **Niyama** KK 11-1-1-8

पितॄणां पुत्रपौत्राणां ज्ञातीनां सुहृदां तथा।
गुरूणां चानुपूर्व्येण ये चान्येऽनुचरा हताः।
प्रेतकार्याणि सर्वाणि कारयस्व नराधिप॥

↩ **Back:** ↩ E.46

Mahābhārata › Strīparva › Jalaprādānikaparva › Adhyāya 8, Śloka 7 **Niyama** KK 11-1-8-7

मित्रनाशेऽर्थनाशे च ज्ञातिसम्बन्धिनामपि।
प्राप्यते सुमहद्दुःखं विषाग्निप्रतिमं विभो॥
पुत्राणामथ पौत्राणां पितॄणां च महीपते।
अानुपूर्व्येण सर्वेषां प्रेतकार्याणि कारय।।

↩ **Back:** ↩ E.46

E.47 The last rites performed by a son — their importance

Speaker / narration: The poet's narration; Daśaratha to Kaikeyī; Lakṣmaṇa to Guha; Guha to Bharata Niyama Puṇya

- **Niyama** The ministers, who knew everything, were unwilling to perform the king's cremation without a son; therefore, as instructed, they placed the king's body in a vessel filled with oil and preserved it (Rām. Ayo. 66.14–15).
- **Niyama** The well-wishers gathered there also did not consent to the king's cremation without a son; so they kept the king on that bed itself (Rām. Ayo. 66.27).
- **Niyama** Daśaratha told Kaikeyī that if Rāma's exile was pleasing to Bharata, then after his death Bharata should not perform his preta rites (Rām. Ayo. 12.92).
- **Niyama** **Puṇya** Lakṣmaṇa said that those who, when the time comes, perform the saṃskāra in all the preta rites for their deceased father are the ones whose purpose is fulfilled (kṛtārthas); Guha conveyed these same words to Bharata (Rām. Ayo. 51.20; 86.18).

Śrīmad Rāmāyaṇa › Ayodhyākāṇḍa › Sarga 66 › Śloka 14 **Niyama** Vā.Rā. 2.66.14

तैलद्रोण्यां तदामात्याः संवेश्य जगतीपतिम्।
राज्ञः सर्वाण्यथादिष्टाश्चक्रुः कर्माण्यनन्तरम्॥

↩ **Back:** ↩ E.47

Śrīmad Rāmāyaṇa › Ayodhyākāṇḍa › Sarga 66 › Śloka 15 **Niyama** Vā.Rā. 2.66.15

न तु संकालनं राज्ञो विना पुत्रेण मन्त्रिणः।
सर्वज्ञाः कर्तुमीषुस्ते ततो रक्षन्ति भूमिपम्॥

↩ **Back:** ↩ E.47

Śrīmad Rāmāyaṇa › Ayodhyākāṇḍa › Sarga 66 › Śloka 27 **Niyama** Vā.Rā. 2.66.27

ऋते तु पुत्राद् दहनं महीपते-
र्नारोचयंस्ते सुहृदः समागताः।
इतीव तस्मिन् शयने न्यवेशयन्
विचिन्त्य राजानमचिन्त्यदर्शनम्॥

↩ **Back:** ↩ E.47

Śrīmad Rāmāyaṇa › Ayodhyākāṇḍa › Sarga 12 › Śloka 92 **Niyama** Vā.Rā. 2.12.92

प्रियं चेद् भरतस्यैतद् रामप्रव्राजनं भवेत्।
मा स्म मे भरतः कार्षीत् प्रेतकृत्यं गतायुषः॥

↩ **Back:** ↩ E.47

Śrīmad Rāmāyaṇa › Ayodhyākāṇḍa › Sarga 51 › Śloka 20 **Niyama** **Puṇya** Vā.Rā. 2.51.20

सिद्धार्थाः पितरं वृत्तं तस्मिन् काले ह्युपस्थिते।
प्रेतकार्येषु सर्वेषु संस्करिष्यन्ति राघवम्॥

↩ **Back:** ↩ E.47

Śrīmad Rāmāyaṇa › Ayodhyākāṇḍa › Sarga 86 › Śloka 18 **Niyama** **Puṇya** Vā.Rā. 2.86.18

सिद्धार्थाः पितरं वृत्तं तस्मिन् काले ह्युपस्थिते।
प्रेतकार्येषु सर्वेषु संस्करिष्यन्ति भूमिपम्॥

↩ **Back:** ↩ E.47

E.48 For one without sons, the daughter's sons should offer udaka and piṇḍas and receive the inheritance

Speaker / narration: Śrī Kṛṣṇa to Akrūra Niyama

- **Niyama** Since Satrājit had no sons, his daughter's sons (dauhitras) should offer handfuls of water and piṇḍas, fully discharge the debt, and take his property (the inheritance) (Bhāg. 10.61.44).

Śrīmad Bhāgavatam › Daśama Skandha › Adhyāya 61 › Śloka 44 **Niyama** Bhāg. 10.61.44

सत्राजितोऽनपत्यत्वाद् गृह्णीयुर्दुहितुः सुताः। दायं निनीयापः पिण्डान् विमुच्यर्णमशेषतः।
तथापि दुर्धरो ह्यन्यैस्त्वय्यास्तां प्रापितो मणिः॥

↩ **Back:** ↩ E.48

E.49 Śrāddha is performed for those who have perished — Kuntī's words

Speaker / narration: Kuntī to Kṛṣṇa Example

- **Example** Referring to Dhanañjaya, the twins (Nakula and Sahadeva) and Vṛkodara, Kuntī said that men perform śrāddha for those who have lost their lives and perished (Udyoga. 90.71).

Mahābhārata › Udyogaparva › Bhagavadyānaparva › Adhyāya 90, Śloka 71 **Example** KK 5-6-90-71

धनञ्जयं च गोविन्द यमौ तं च वृकोदरम्।
जीवनाशं प्रनष्टानां श्राद्धं कुर्वन्ति मानवाः॥

↩ **Back:** ↩ E.49

E.50 Saṃskāra with a palāśa effigy for those who die abroad and whose body is not found

Speaker / narration: Śrī Kṛṣṇa's answer to Yudhiṣṭhira's question Niyama

- **Niyama** Yudhiṣṭhira asked: if a vipra dies in another land and his body is lost, how is the preta-karma to be done for him? (Āśva. 118.1).
- **Niyama** For such an āhitāgni (keeper of the sacred fires), an effigy should be made of palāśa stalks as the śāstra prescribes, and the saṃskāra performed (Āśva. 118.2).
- **Niyama** The body is said to have three hundred and sixty bones; they should be divided and arranged according to the śāstra (Āśva. 118.3).
- **Niyama** Forty for the head, ten for the neck, a hundred for the arms, ten for the fingers (Āśva. 118.4); thirty for the chest, twenty for the belly, six and four for the private parts (Āśva. 118.5).
- **Niyama** A hundred for the thighs, thirty for the knees and calves, ten for the feet — this is the preta-niṣkṛti (Āśva. 118.6).

Mahābhārata › Āśvamedhikaparva › Vaiṣṇavadharmaparva › Adhyāya 118, Śloka 1 **Niyama** KK 14-3-118-1

देशान्तरगते विप्रे संयुक्ते कालधर्मणा ।
शरीरनाशे सम्प्राप्ते कथं प्रेतत्वकल्पना ॥

↩ **Back:** ↩ A.4 · Niyama ↩ E.50

Mahābhārata › Āśvamedhikaparva › Vaiṣṇavadharmaparva › Adhyāya 118, Śloka 2 **Niyama** KK 14-3-118-2

भगवानुवाच —
।
श्रूयतामाहिताग्नेस्तु तथाभूतस्य संस्क्रिया ।
पालाशबृन्दैः प्रतिमा कर्तव्या कल्पचोदिता ॥

↩ **Back:** ↩ A.4 · Niyama ↩ E.50

Mahābhārata › Āśvamedhikaparva › Vaiṣṇavadharmaparva › Adhyāya 118, Śloka 3 **Niyama** KK 14-3-118-3

त्रीणि षष्टिशतान्याहुरस्थीन्यस्य युधिष्ठिर ।
तेषां विकल्पना कार्या यथाशास्त्रं विनिश्चितम् ॥

↩ **Back:** ↩ E.50

Mahābhārata › Āśvamedhikaparva › Vaiṣṇavadharmaparva › Adhyāya 118, Śloka 4 **Niyama** KK 14-3-118-4

अशीत्यर्धं शिरसि च ग्रीवायां दश एव च ।
बाह्वोश्चापि शतं दद्यादङ्गुलीषु पुनर्दश ॥

↩ **Back:** ↩ E.50

Mahābhārata › Āśvamedhikaparva › Vaiṣṇavadharmaparva › Adhyāya 118, Śloka 5 **Niyama** KK 14-3-118-5

उरसि त्रिंशतं दद्याज्जठरे वाऽपि विंशतिम् ।
वृषणे द्वादशार्धं तु शिश्ने चाष्टार्धमेव च ॥

↩ **Back:** ↩ E.50

Mahābhārata › Āśvamedhikaparva › Vaiṣṇavadharmaparva › Adhyāya 118, Śloka 6 **Niyama** KK 14-3-118-6

दद्यात्तु शतमूर्वोस्तु षष्ट्यर्धं जानुजङ्घयोः ।
दश दद्याच्चरणयोरेषा प्रेतस्य निष्कृतिः ॥

↩ **Back:** ↩ E.50

E.51 Excessive grief torments the forefathers; the pitṛs are satisfied with svadhā

Speaker / narration: Śrī Kṛṣṇa to Yudhiṣṭhira Niyama Pāpa

- **Pāpa** If one grieves excessively in the mind, it torments the forefathers who died before (Āśva. 2.2).
- **Niyama** Śrī Kṛṣṇa told Yudhiṣṭhira to give up grief, perform yajñas with good dakṣiṇās, and satisfy the devas with soma and the pitṛ-devatās with svadhā (Āśva. 2.3).

Mahābhārata › Āśvamedhikaparva › Aśvamedhaparva › Adhyāya 2, Śloka 2 **Pāpa** KK 14-1-2-2

अतीव मनसा शोकः क्रियमाणो जनाधिप ।
सन्तपयति चैतस्य पूर्वप्रेतान्पितामहान् ॥

↩ **Back:** ↩ A.4 · Niyama ↩ E.51

Mahābhārata › Āśvamedhikaparva › Aśvamedhaparva › Adhyāya 2, Śloka 3 **Niyama** KK 14-1-2-3

यजस्व विविधैर्यज्ञैर्बहुभिः स्वाप्तदक्षिणैः ।
देवांस्तर्पय सोमेन स्वधया च पितॄनपि ॥

↩ **Back:** ↩ E.51

E.52 Karṇa, who would not deprive the mother who raised him of her piṇḍa

Speaker / narration: Karṇa to Kṛṣṇa Niyama Pāpa

- **Niyama** **Pāpa** Karṇa said: how could one like him, who listens to the dharma-śāstras, leave Rādhā, who raised him, without a piṇḍa (the offering of piṇḍas)? (Udyoga. 141.7).

Mahābhārata › Udyogaparva › › Adhyāya 141, Śloka 7 **Niyama** **Pāpa** KK 5-6-141-7

तस्याः पिण्डव्यपनयं कुर्यादस्मद्विधः कथम् ।
धर्मविद्धर्मशास्त्राणां श्रवणे सततं रतः ॥

↩ **Back:** ↩ E.52

(d) Special days and times — tithi, nakṣatra, amāvāsyā, kṛṣṇa-pakṣa, Maghā, eclipse

E.53 The aparāhṇa alone is the time for rites to the pitṛs

Speaker / narration: Bhīṣma to Yudhiṣṭhira Niyama Pāpa

- **Niyama** Yudhiṣṭhira asked about the procedure of the rites to the devas and to the pitṛs at the time of śrāddha (Anu. 61.1).
- **Niyama** Rites to the devas should be done in the forenoon and rites to the pitṛs in the aparāhṇa (afternoon), with auspicious observances, after purifying oneself, with care; to human beings one should give at midday (Anu. 61.2–3).
- **Pāpa** A gift given at the wrong time becomes the share of the rākṣasas (Anu. 61.3).
- **Niyama** If the day is divided into portions of three muhūrtas — prātaḥ, saṅgava, madhyāhna — the fourth, the aparāhṇa (three muhūrtas), is the time for the pitṛs; śrāddha should always be performed in this aparāhṇa alone (Anu. 61.35–38).

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 61, Śloka 1 **Niyama** KK 13-1-61-1

श्राद्धकाले च दैवे च पित्र्येऽपि च पितामह ।
इच्छामीह त्वयाऽऽख्यातं विहितं यत्सुरर्षिभिः ॥

↩ **Back:** ↩ E.53

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 61, Śloka 2 **Niyama** KK 13-1-61-2

दैवं पौर्वाह्णिके कुर्यादपराह्णे तु पैतृकम् ।
मङ्गलाचारसम्पन्नः कृतशौचः प्रयत्नवान् ॥

↩ **Back:** ↩ A.4 · Niyama ↩ E.53

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 61, Śloka 3 **Niyama** **Pāpa** KK 13-1-61-3

मनुष्याणां तु मध्याह्ने प्रदद्यादुपपत्तिभिः ।
कालहीनं तु यद्दानं तं भागं रक्षसां विदुः ॥

↩ **Back:** ↩ A.3 · Pāpa ↩ A.4 · Niyama ↩ E.53 ↩ E.53

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 61, Śloka 35 **Niyama** KK 13-1-61-35

मुहूर्तानां त्रयं पूर्वमह्नः प्रातरिति स्मृतम् ।
जपध्यानादिभिस्तस्मिन्विप्रैः कार्यं शुभव्रतम् ॥

↩ **Back:** ↩ E.53

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 61, Śloka 36 **Niyama** KK 13-1-61-36

सङ्गवाख्यं त्रिभागं तु मध्याह्नस्त्रिमुहूर्तकः ।
लौकिकं सङ्गवेऽर्धं च स्नानादि ह्यथ मध्यमे ॥

↩ **Back:** ↩ E.53

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 61, Śloka 37 **Niyama** KK 13-1-61-37

चतुर्थमपराह्णं तु त्रिमुहूर्तं तु पित्र्यकम् ।
सायाह्नस्त्रिमुहूर्तं च मध्यमं कविभिः स्मृतम् ॥

↩ **Back:** ↩ E.53

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 61, Śloka 38 **Niyama** KK 13-1-61-38

चतुर्थे त्वपराह्णाख्ये श्राद्धं कुर्यात्सदा नृप ॥

↩ **Back:** ↩ E.53

E.54 The kṛṣṇa-pakṣa and the aparāhṇa are best

Speaker / narration: Bhīṣma to Yudhiṣṭhira Niyama

- **Niyama** In the kṛṣṇa-pakṣa, the tithis from daśamī onward, leaving out caturdaśī, are commended for śrāddha; the others are not so (Anu. 134.20).
- **Niyama** Just as the kṛṣṇa-pakṣa is superior to the śukla-pakṣa, so for śrāddha the aparāhṇa (afternoon) is superior to the pūrvāhṇa (forenoon) (Anu. 134.21).

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 134, Śloka 20 **Niyama** KK 13-1-134-20

कृष्णपक्षे दशम्यादौ वर्जयित्वा चतुर्दशीम् ।
श्राद्धकर्मणि तिथ्यस्तु प्रशस्ता न तथेतराः ॥

↩ **Back:** ↩ E.54

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 134, Śloka 21 **Niyama** KK 13-1-134-21

यथा चैवापरः पक्षः पूर्वपक्षाद्विशिष्यते ।
तथा श्राद्धस्य पूर्वाह्णादपराह्णो विशिष्यते ॥

↩ **Back:** ↩ A.4 · Niyama ↩ E.54

E.55 The fruit of śrāddha by tithi

Speaker / narration: Bhīṣma to Yudhiṣṭhira Niyama Pāpa Puṇya

- Niyama Bhīṣma told what fruit comes from performing śrāddha on each tithi (Anu. 134.9).
- Puṇya Pratipadā — beautiful women who bear good children come into the home; dvitīyā — daughters are born; tṛtīyā — horses; caturthī — small livestock become plentiful (Anu. 134.10–11).
- Puṇya Pañcamī — many sons; ṣaṣṭhī — radiance; saptamī — gain in agriculture; aṣṭamī — profit in trade (Anu. 134.12–13).
- Puṇya Navamī — single-hoofed animals in plenty; daśamī — cows increase; ekādaśī — wealth in kupya (base metals), and sons with brahma-varcas; dvādaśī — silver, wealth and gold (Anu. 134.14–16).
- Pāpa Puṇya Trayodaśī — he becomes foremost among his kinsmen, but it is said that young men in his house will surely die; caturdaśī — he becomes one who takes part in war (Anu. 134.17–18).
- Puṇya One who offers piṇḍa on amāvāsyā obtains all his desires (Anu. 134.19).

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 134, Śloka 9 Niyama KK 13-1-134-9

प्रवक्ष्यामि तु ते सर्वांस्तिथ्यांतिथ्यां दिने गुणान् ।
येष्वहःसु कृतैः श्राद्धैर्यत्फलं प्राप्यतेऽनघ ।
तत्सर्वं कीर्तयिष्यामि यथावत्तन्निबोध मे ॥

↩ Back: ↩ E.55

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 134, Śloka 10 Puṇya KK 13-1-134-10

पितॄनर्च्य प्रतिपदि प्राप्नुयात्स्वगृहे स्त्रियः ।
अभिरूपप्रजायिन्यो दर्शनीया बहुप्रजाः ॥

↩ Back: ↩ E.55

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 134, Śloka 11 Puṇya KK 13-1-134-11

स्त्रियो द्वितीयां जायन्ते तृतीयायां तु वाजिनः ।
चतुर्थ्यां क्षुद्रपशवो भवन्ति बहवो गृहे ॥

↩ Back: ↩ E.55

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 134, Śloka 12 Puṇya KK 13-1-134-12

पञ्चम्यां बहवः पुत्रा जायन्ते कुर्वतां नृप ।
कुर्वाणास्तु नराः षष्ठ्यां भवन्ति द्युतिभागिनः ॥

↩ Back: ↩ E.55

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 134, Śloka 13 Puṇya KK 13-1-134-13

कृषिभागी भवेच्छ्राद्धं कुर्वाणः सप्तमीं नृप ।
अष्टम्यां तु प्रकुर्वाणो वाणिज्ये लाभमाप्नुयात् ॥

↩ Back: ↩ E.55

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 134, Śloka 14 Puṇya KK 13-1-134-14

नवम्यां कुर्वतः श्राद्धं भवत्येकशफं बहु ।
विवर्धन्ते तु दशमीं गावः श्राद्धानि कुर्वतः ॥

↩ Back: ↩ E.55

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 134, Śloka 15 Puṇya KK 13-1-134-15

कुप्यभागी भवेन्मर्त्यः कुर्वन्नेकादशीं नृप ।
ब्रह्मवर्चस्विनः पुत्रा जायन्ते तस्य वेश्मनि ॥

↩ Back: ↩ E.55

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 134, Śloka 16 Puṇya KK 13-1-134-16

द्वादश्यामीहमानस्य नित्यमेव प्रदृश्यते ।
रजतं बहुवित्तं च सुवर्णं च मनोरमम् ॥

↩ Back: ↩ E.55

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 134, Śloka 17 Pāpa Puṇya KK 13-1-134-17

ज्ञातीनां तु भवेच्छ्रेष्ठः कुर्वञ्श्राद्धं त्रयोदशीम् ॥

↩ Back: ↩ E.55

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 134, Śloka 18 Pāpa Puṇya KK 13-1-134-18

अवश्यं तु युवानोऽस्य प्रमीयन्ते नरा गृहे ।
युद्धभागी भवेन्मर्त्यः कुर्वञ्श्राद्धं चतुर्दशीम् ॥

↩ Back: ↩ E.55

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 134, Śloka 19 Puṇya KK 13-1-134-19

अमावास्यां तु निवपन्सर्वकामानवाप्नुयात् ॥

↩ Back: ↩ A.4 · Niyama ↩ E.55

E.56 The fruit of kāmya śrāddha by nakṣatra (Kṛttikā to Anurādhā)

Speaker / narration: Told by Yama to Śaśabindu — Bhīṣma to Yudhiṣṭhira Niyama Pāpa Puṇya

- Niyama The kāmya śrāddhas, nakṣatra by nakṣatra, that Yama told Śaśabindu (Anu. 136.1).
- Puṇya One who always performs śrāddha under Kṛttikā establishes the sacred fires and performs yajña with offspring and free from sorrow (Anu. 136.2).
- Pāpa Puṇya Rohiṇī — offspring; Mṛgaśiras — radiance; one who gives śrāddha under Ārdrā becomes a doer of cruel deeds (Anu. 136.3).
- Puṇya Punarvasu — gain in agriculture; Puṣya — prosperity; Āśleṣā — steadfast sons; Maghā — pre-eminence among kinsmen (Anu. 136.4–5).
- Puṇya Pūrva Phalgunī — good fortune; Uttara Phalgunī — offspring; Hasta — attainment of fruits; Citrā — handsome sons; Svātī — a livelihood through trade (Anu. 136.6–7).
- Puṇya Viśākhā — one who desires a son gets many sons; Anurādhā — he rules over a kingdom (Anu. 136.8).

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 136, Śloka 1 Niyama KK 13-1-136-1

यमस्तु यानि श्राद्धानि प्रोवाच शशबिन्दवे ।
तानि मे शृणु काम्यानि नक्षत्रेषु पृथक्पृथक् ॥

↩ Back: ↩ A.2 · Sadgati ↩ E.56

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 136, Śloka 2 Puṇya KK 13-1-136-2

श्राद्धं यः कृत्तिकायोगे कुर्वीत सततं नरः ।
अग्नीनाधाय सापत्यो यजेत विगतज्वरः ॥

↩ Back: ↩ E.56

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 136, Śloka 3 Pāpa Puṇya KK 13-1-136-3

अपत्यकामो रोहिण्यां तेजस्कामो मृगोत्तमे ।
क्रूरकर्मा ददच्छ्राद्धमार्द्रायां मानवो भवेत् ॥

↩ Back: ↩ E.56

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 136, Śloka 4 **Puṇya** KK 13-1-136-4

कृषिभागी भवेन्मर्त्यः कुर्वञ्श्राद्धं पुनर्वसौ ।
पुष्टिकामोऽथ पुष्येण श्राद्धमीहेत मानवः ॥

↩ **Back:** ↩ E.56

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 136, Śloka 5 **Puṇya** KK 13-1-136-5

आश्लेषायां ददच्छ्राद्धं धीरान्पुत्रान्प्रजायते ।
ज्ञातीनां तु भवेच्छ्रेष्ठो मघासु श्राद्धमावपन् ॥

↩ **Back:** ↩ E.56

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 136, Śloka 6 **Puṇya** KK 13-1-136-6

फल्गुनीषु ददच्छ्राद्धं सुभगः श्राद्धदो भवेत् ।
अपत्यभागुत्तरासु हस्तेन फलभाग्भवेत् ॥

↩ **Back:** ↩ E.56

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 136, Śloka 7 **Puṇya** KK 13-1-136-7

चित्रायां तु ददच्छ्राद्धं लभेद्रूपवतः सुतान् ।
स्वातियोगे पितॄनर्च्य वाणिज्यमुपजीवति ॥

↩ **Back:** ↩ E.56

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 136, Śloka 8 **Puṇya** KK 13-1-136-8

बहुपुत्रो विशाखासु पुत्रमीहन्भवेन्नरः ।
अनुराधासु कुर्वाणो राज्यचक्रं प्रवर्तयेत् ॥

↩ **Back:** ↩ E.56

E.57 The fruits of kāmya śrāddha according to nakṣatra (Jyeṣṭhā–Bharaṇī); Śaśabindu's fruit

Speaker / narration: As Yama told Śaśabindu — Bhīṣma to Yudhiṣṭhira Example Puṇya

- **Puṇya** Jyeṣṭhā — (for the man who, being prosperous and placing self-restraint first, offers śrāddha) lordship; Mūlā — health; Pūrvāṣāḍhā — the highest fame; Uttarāṣāḍhā — he moves about the earth free of sorrow (Anu. 136.9–10).
- **Puṇya** Abhijit — excellent learning; Śravaṇa — after death he attains that state; Dhaniṣṭhā — a share of a kingdom; Śatabhiṣak (the nakṣatra of Varuṇa) — success in medicine (Anu. 136.11–12).
- **Puṇya** Pūrvābhādrā — many goats and sheep; Uttarābhādrā — thousands of cows; Revatī — kupya (metal) wealth; Aśvinī — horses; Bharaṇī — the best of long life (Anu. 136.13–14).
- **Example** **Puṇya** Having heard this procedure of śrāddha, Śaśabindu did accordingly, and without toil conquered and ruled the earth (Anu. 136.15).

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 136, Śloka 9 **Puṇya** KK 13-1-136-9

आधिपत्यं व्रजेन्मर्त्यो ज्येष्ठायामपवर्जयन् ।
नरः कुरुकुलश्रेष्ठ ऋद्धो दमपुरःसरः ॥

↩ **Back:** ↩ E.57

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 136, Śloka 10 **Puṇya** KK 13-1-136-10

मूले त्वारोग्यमृच्छेत यशोऽषाढासु चोत्तमम् ।
उत्तरासु त्वषाढासु वीतशोकश्चरेन्महीम् ॥

↩ **Back:** ↩ E.57

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 136, Śloka 11 **Puṇya** KK 13-1-136-11

श्राद्धं त्वभिजितौ कुर्वन्विद्यां श्रेष्ठामवाप्नुयात् ।
श्रवणेषु ददच्छ्राद्धं प्रेत्य गच्छेत्स तद्गतिम् ॥

↩ **Back:** ↩ E.57

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 136, Śloka 12 **Puṇya** KK 13-1-136-12

राज्यभागी धनिष्ठायां भवेत नियतं नरः ।
नक्षत्रे वारुणे कुर्वन्भिषक्सिद्धिमवाप्नुयात् ॥

↩ **Back:** ↩ E.57

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 136, Śloka 13 **Puṇya** KK 13-1-136-13

पूर्वप्रोष्ठपदाः कुर्वन्बहून्विन्दत्यजाविकान् ।
उत्तरासु प्रकुर्वाणो विन्दते गाः सहस्रशः ॥

↩ **Back:** ↩ E.57

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 136, Śloka 14 **Puṇya** KK 13-1-136-14

बहुकुप्यकृतं वित्तं विन्दते रेवतीं श्रितः ।
अश्विनीष्वश्वान्विन्देत भरणीष्वायुरुत्तमम् ॥

↩ **Back:** ↩ E.57

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 136, Śloka 15 **Example** **Puṇya** KK 13-1-136-15

इमं श्राद्धविधिं श्रुत्वा शशबिन्दुस्तथाऽकरोत् ।
अक्लेसेनाजयच्चापि महीं सोऽनुशशास ह ॥

↩ **Back:** ↩ A.2 · Sadgati ↩ E.57

E.58 Proper times for śrāddha

Speaker / narration: Bhīṣma to Yudhiṣṭhira Niyama

- **Niyama** Obtaining a worthy brāhmaṇa, obtaining curds and ghee, the waning of the Moon (amāvāsyā), and obtaining certain other havis from the forest — these are the times for śrāddha (Anu. 61.34).

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 61, Śloka 34 **Niyama** KK 13-1-61-34

श्राद्धस्य ब्राह्मणः कालः प्राप्तं दधि घृतं तथा ।
सोमक्षयश्च मांसं च यदारण्यं युधिष्ठिर ॥

↩ **Back:** ↩ E.58

E.59 Special times for śrāddha: eclipse, ayana, Maghā, Gayā

Speaker / narration: Śrī Kṛṣṇa to Yudhiṣṭhira Niyama Pāpa Puṇya

- Niyama Puṇya What is given during an eclipse, at the viṣuva, at the end of an ayana, at the pitrya (rite), on Maghā, when a son is born to oneself, at Gayā, and at piṇḍa(-pradāna)s becomes equal to a thousand niṣkas (Āśva. 110.27).
- Niyama The tṛtīyā of the month of Vaiśākha, the tithi in the śukla-pakṣa of Kārttika (the printed reading is ‘anavadyā'sau’; in the parallel śloka in the Purāṇas it is ‘navamyasau’, the navamī), the trayodaśī of the kṛṣṇa-pakṣa of the month of Nabhasya (Bhādrapada), and the pañcadaśī in Māgha (Āśva. 110.28).
- Niyama Puṇya Lunar and solar eclipses and the two ayanas are times for śrāddha; if at those times one, being pure, gives even water mixed with tila to the pitṛ-devatās, it is as if one had performed śrāddha for a thousand years; this is a secret told by the pitṛ-devatās themselves (Āśva. 110.29).
- Pāpa One who, in a single paṅkti, serves with partiality out of affection, fear or for money is called by the sages cruel, of evil conduct, without self-control, and a slayer of brāhmaṇas (Āśva. 110.30).

Mahābhārata › Āśvamedhikaparva › Vaiṣṇavadharmaparva › Adhyāya 110, Śloka 27 Niyama Puṇya KK 14-3-110-27

ग्रहोपरागे विषुवेऽयनान्ते पित्र्ये मघासु स्वसुते च जाते ।
गयेषु पिण्डेषु च पाण्डुपुत्र दत्तं भवेन्निष्कसहस्रतुल्यम् ॥

↩ Back: ↩ A.4 · Niyama ↩ E.59

Mahābhārata › Āśvamedhikaparva › Vaiṣṇavadharmaparva › Adhyāya 110, Śloka 28 Niyama KK 14-3-110-28

वैशाखमासस्य तु या तृतीयाऽनवद्याऽसौ कार्तिकशुक्लपक्षे ।
नभस्यमासस्य च कृष्णपक्षे त्रयोदशी पञ्चदशी च माघे ॥

↩ Back: ↩ E.59

Mahābhārata › Āśvamedhikaparva › Vaiṣṇavadharmaparva › Adhyāya 110, Śloka 29 Niyama Puṇya KK 14-3-110-29

उपप्लवे चन्द्रमसो रवेश्च श्राद्धस्य कालो ह्ययनद्वये च ।
पानीयमप्यत्र तिलैर्विमिश्रं दद्यात्पितृभ्यः प्रयतो मनुष्यः ।
श्राद्धं कृतं तेन समासहस्रं रहस्यमेतत्पितरो वदन्ति ॥

↩ Back: ↩ A.2 · Sadgati ↩ E.59

Mahābhārata › Āśvamedhikaparva › Vaiṣṇavadharmaparva › Adhyāya 110, Śloka 30 Pāpa KK 14-3-110-30

यस्त्वेकपङ्क्त्यां विषमं ददाति स्नेहाद्भयाद्वा यदि वाऽर्थहेतोः ।
क्रूरं दुराचारमनात्मवन्तं ब्रह्मघ्नमेनं कवयो वदन्ति ॥

↩ Back: ↩ E.59

E.60 Śrāddha in the kṛṣṇa-pakṣa of Bhādrapada; special times for śrāddha and other good deeds

Speaker / narration: Nārada to Yudhiṣṭhira Niyama Puṇya

- **Niyama** A dvija should perform śrāddha for his parents, according to his means, in the kṛṣṇa-pakṣa (aparapakṣa) of the month of Bhādrapada (Proṣṭhapada); if he is wealthy, he should perform it for their relatives as well (Bhāg. 7.14.20).
- **Niyama** Ayana (the beginning of uttarāyaṇa and dakṣiṇāyana), viṣuva, kuhū (amāvāsyā), vyatīpāta, dina-kṣaya, lunar and solar eclipses, dvādaśī and the Śravaṇa nakṣatra are also special times (Bhāg. 7.14.21).
- **Niyama** The tṛtīyā of the śukla-pakṣa, the navamī of the month of Kārttika, and the four aṣṭakās of the Hemanta and Śiśira seasons are likewise such times (Bhāg. 7.14.22).
- **Niyama** The śukla saptamī of Māgha, the day when the Maghā nakṣatra coincides with the pūrṇimā, and the days when the month-nakṣatras coincide with the pūrṇimā (rākā) or with anumati are also special times (Bhāg. 7.14.23).
- **Niyama** The days when Anurādhā, Śravaṇa or the three Uttarās coincide with dvādaśī, the days when those three Uttarās coincide with ekādaśī, and the day of one's birth-nakṣatra joined with an auspicious yoga are also special times (Bhāg. 7.14.24).
- **Niyama** **Puṇya** These times increase people's welfare; in them one should do good deeds with all one's strength, and that becomes a welfare for one's life that is never in vain (Bhāg. 7.14.25).
- **Puṇya** Snāna, japa, homa, vrata, worship of the devas and brāhmaṇas, and gifts given to the pitṛ-devatās, the devas, human beings and bhūtas in these times never perish (Bhāg. 7.14.26).
- **Niyama** The times of the saṃskāras of one's wife, one's children and oneself, the preta-saṃskāra (preta-saṃsthā), the mṛtāha (the day of death), and the time of the abhyudaya rite are also (such times) (Bhāg. 7.14.27).

Śrīmad Bhāgavatam › Saptama Skandha › Adhyāya 14 › Śloka 20 **Niyama** Bhāg. 7.14.20

कुर्यादपरपक्षीयं मासि प्रोष्ठपदे द्विजः ।
श्राद्धं पित्रोर्यथावित्तं तद्बन्धूनां च वित्तवान् ॥

↩ **Back:** ↩ A.0 · Pitṛ-devatās ↩ A.4 · Niyama ↩ E.60

Śrīmad Bhāgavatam › Saptama Skandha › Adhyāya 14 › Śloka 21 **Niyama** Bhāg. 7.14.21

अयने विषुवे कुह्वां व्यतीपाते दिनक्षये ।
चन्द्रादित्योपरागे च द्वादश्यां श्रवणेषु च ॥

↩ **Back:** ↩ A.0 · Pitṛ-devatās ↩ E.60

Śrīmad Bhāgavatam › Saptama Skandha › Adhyāya 14 › Śloka 22 **Niyama** Bhāg. 7.14.22

तृतीयायां शुक्लपक्षे नवम्यामथ कार्तिके ।
चतसृष्वप्यष्टकासु हेमन्ते शिशिरे तथा ॥

↩ **Back:** ↩ A.0 · Pitṛ-devatās ↩ E.60

Śrīmad Bhāgavatam › Saptama Skandha › Adhyāya 14 › Śloka 23 **Niyama** Bhāg. 7.14.23

माघे च सितसप्तम्यां मघाराकासमागमे ।
राकया वाऽनुमत्या वा मासर्क्षाणि युतान्यपि ॥

↩ **Back:** ↩ A.0 · Pitṛ-devatās ↩ E.60

Śrīmad Bhāgavatam › Saptama Skandha › Adhyāya 14 › Śloka 24 **Niyama** Bhāg. 7.14.24

द्वादश्यामनुराधा स्यात् श्रवणस्तिस्र उत्तराः ।
तिसृष्वेकादशी चासु जन्मर्क्षं सौम्ययोगयुक् ॥

↩ **Back:** ↩ A.0 · Pitṛ-devatās ↩ E.60

Śrīmad Bhāgavatam › Saptama Skandha › Adhyāya 14 › Śloka 25 **Niyama** **Puṇya** Bhāg. 7.14.25

त एते श्रेयसः काला नृणां श्रेयोविवर्धनाः ।
कुर्यात् सर्वात्मनैतेषु श्रेयोऽमोघं तदायुषः ॥

↩ **Back:** ↩ A.0 · Pitṛ-devatās ↩ E.60

Śrīmad Bhāgavatam › Saptama Skandha › Adhyāya 14 › Śloka 26 **Puṇya** Bhāg. 7.14.26

येषु स्नानं जपो होमो व्रतं देवद्विजार्चनम् ।
पितृदेवनृभूतेभ्यो यद् दत्तं तद्ध्यनश्वरम् ॥

↩ **Back:** ↩ A.0 · Pitṛ-devatās ↩ E.60

Śrīmad Bhāgavatam › Saptama Skandha › Adhyāya 14 › Śloka 27 **Niyama** Bhāg. 7.14.27

संस्कारकालो जायाया अपत्यस्यात्मनस्तथा ।
प्रेतसंस्था मृताहश्च कर्मण्यभ्युदये नृप ॥

↩ **Back:** ↩ A.0 · Pitṛ-devatās ↩ E.60

E.61 Offering pāyasa on Maghā in the kṛṣṇa-pakṣa of Bhādrapada

Speaker / narration: Agni Deva (a secret dharma told by Bhīṣma) Niyama Puṇya

- **Niyama** In the month of Bhādrapada, in the kṛṣṇa-pakṣa, when the Maghā nakṣatra prevails, an offering of paramānna (sweet rice) should be made to the pitṛ-devatās in the gajacchāyā (elephant's shadow) on the east side, at the kutapa time, facing south; this is a supreme secret (Anu. 189.31–32).
- **Puṇya** One who gives thus obtains the fruit of performing a mahā-śrāddha for thirteen years (Anu. 189.33).

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 189, Śloka 31 **Niyama** KK 13-1-189-31

एते दोषा मया प्रोक्तास्त्रिषु यः पादमुत्सृजेत् ।
श्रूयतां परमं गुह्यं रहस्यं धर्मसंहितम् ।
परमान्नेन यो दद्यात्पितॄणामौपहारिकम् ॥

↩ **Back:** ↩ A.2 · Sadgati ↩ E.61

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 189, Śloka 32 **Niyama** KK 13-1-189-32

गजच्छायायां पूर्वस्यां कुतपे दक्षिणामुखः ।
यदा भाद्रपदे मासि भवते बहुले मघा ॥

↩ **Back:** ↩ A.2 · Sadgati ↩ E.61

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 189, Śloka 33 **Puṇya** KK 13-1-189-33

श्रूयतां तस्य दानस्य यादृशो गुणविस्तरः ।
कृतं तेन महच्छ्राद्धं वर्षाणीह त्रयोदश ॥

↩ **Back:** ↩ A.2 · Sadgati ↩ E.61

E.62 The Pitṛ-gāthā: pāyasa on Maghā trayodaśī, and the pilgrimage to Gayā

Speaker / narration: Bhīṣma to Yudhiṣṭhira (the Pitṛ-gītā gāthā told by Sanatkumāra) Niyama Puṇya

- **Niyama** Long ago Sanatkumāra told Bhīṣma the gāthās sung by the pitṛs (Anu. 135.11).
- **Niyama** **Puṇya** The pitṛs wish: ‘May one be born in our family who, in dakṣiṇāyana, on the trayodaśī joined with the Maghā nakṣatra, gives us pāyasa mixed with ghee’ (Anu. 135.12).
- **Niyama** ‘Or one who, on Maghā itself, observing vrata-niyama, in the elephant's shadow (hasticchāyāsu), while being fanned with a fan of (elephant's) ears, gives according to the rule with certain other havis’ (Anu. 135.13).
- **Puṇya** One should wish for many sons, for it is enough if even one of them goes to Gayā, famed for the Akṣayavaṭa (Anu. 135.14).

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 135, Śloka 11 **Niyama** KK 13-1-135-11

गाथाश्चाप्यत्र गायन्ति पितृगीता युधिष्ठिर ।
सनत्कुमारो भगवान्पुरा मय्यभ्यभाषत ॥

↩ **Back:** ↩ E.62

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 135, Śloka 12 **Niyama** **Puṇya** KK 13-1-135-12

अपि नः स्वकुले जायाद्यो नो दद्यात्त्रयोदशीम् ।
मघासु सर्पिःसंयुक्तं पायसं दक्षिणायने ॥

↩ **Back:** ↩ A.2 · Sadgati ↩ E.62

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 135, Śloka 13 **Niyama** KK 13-1-135-13

आजेन वाऽपि लौहेन मघास्वेव यतव्रतः ।
हस्तिच्छायासु विधिवत्कर्णव्यजनवीजितम् ॥

↩ **Back:** ↩ E.62

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 135, Śloka 14 **Puṇya** KK 13-1-135-14

एष्टव्या बहवः पुत्रा यद्येकोपि गयां व्रजेत् ।
यत्रासौ प्रथितो लोकेष्वक्षय्यकरणो वटः ॥

↩ **Back:** ↩ E.62

E.63 The aṣṭakās belong to the pitṛ-devatās

Speaker / narration: Bhīṣma to Yudhiṣṭhira Niyama

- **Niyama** In the good conduct described by Bhīṣma are mentioned properly prepared pāyasa, yāvaka and kṛsara as havis, the aṣṭakās pertaining to the pitṛ-devatās, and the worship of the grahas (Anu. 268.30).

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 268, Śloka 30 **Niyama** KK 13-1-268-30

संस्कृतं पायसं नित्यं यावकं कृसरं हविः ।
अष्टकाः पितृदैवत्या ग्रहाणामभिपूजनम् ॥

↩ **Back:** ↩ E.63

E.64 The best times and the forbidden times for the pitṛmedha

Speaker / narration: Maheśvara to the goddess Umā Niyama Puṇya

- **Niyama** For śrāddha-karma the months of Māgha and Proṣṭhapada (Bhādrapada) are honoured; among the pakṣas, the kṛṣṇa-pakṣa is better than the śukla-pakṣa (Anu. 238.7).
- **Niyama** **Puṇya** Amāvāsyā, trayodaśī, navamī, pratipadā — the forefathers are satisfied by what is given on these tithis (Anu. 238.8).
- **Niyama** A learned man should not perform śrāddha in the forenoon, in the śukla-pakṣa, at night, on birthdays or on even-numbered days (Anu. 238.9).
- **Niyama** This is the honoured time for the pitṛmedha; the time when a worthy brāhmaṇa recipient is found is also the time for śrāddha (Anu. 238.10).

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 238, Śloka 7 **Niyama** KK 13-1-238-7

माघप्रोष्ठपदौ मासौ श्राद्धकर्मणि पूजितौ ।
पक्षयोः कृष्णपक्षश्च पूर्वपक्षात्प्रशस्यते ॥

↩ **Back:** ↩ A.0 · Pitṛ-devatās ↩ A.4 · Niyama ↩ E.64

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 238, Śloka 8 **Niyama** **Puṇya** KK 13-1-238-8

अमावास्यां त्रयोदश्यां नवम्यां प्रतिपत्सु च ।
तिथिष्वेतासु तुष्यन्ति दत्तेनेह पितामहाः ॥

↩ **Back:** ↩ E.64

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 238, Śloka 9 **Niyama** KK 13-1-238-9

पूर्वाह्णे शुक्लपक्षे च रात्रौ जन्मदिनेषु वा ।
युग्मेष्वहस्सु च श्राद्धं न च कुर्वीत पण्डितः ॥

↩ **Back:** ↩ E.64

Mahābhārata › Anuśāsanaparva › Dānadharmaparva › Adhyāya 238, Śloka 10 **Niyama** KK 13-1-238-10

एष कालो मया प्रोक्तः पितृमेधस्य पूजितः ।
